No. १३९५

Title चिन्तामणि शब्द खण्ड:

Author ×

Extent ~~३१~~ २१ Age ×

Subject न्याय शास्त्रं

विवेकः

चिन्तामणि प्रबु~~[illegible]~~ः

१२९५

[illegible] मंदत्वे नत्वेदहेतुत्वायपवनारम्भपवेदानीमंदइतिधस्वसिद्धानात् गकारानित्यत्वेपितथा
प्रतीतिवेत्ता नहिनित्यत्वेपिकर्णशष्कुलीत्वगीन्द्रियोपनीतवायुधर्मोत्पन्नेरूपाधिर्ध्वंसे तव तिा नववायोरप्रतीतिःकत्पन्न
नतभ्रतीतेन लोहितत्वेनैवजवाकुसुमस्यस्फटिकेऽ रक्त वाप्रागनुपलभ्यमानत्वौत्पन्नस्यसाद्ध्येनस्फटोत्पत्ति
मत्वारोपःनत्वेवं घटादावपिनोत्पत्तिःसिद्धेतिवाच्यं। कुलालव्यापारानंतरमनुभूयमानघटस्य तद्व्यापारप्रागनु
भूयमानघटेननाभेदो ऽस्मात्तेनकिंतुभेदएवेतिनतथा सत्वेसत्वेसि व्याति। गकारेतु व्यक्तिप्रतीसनंतरं कंठता
ल्वादिव्यापारात्पूर्वमनुभूयमानगकारेणाभेदःप्रत्यं नादीपवत्स्वजनकएव। अथमंदत्वघतेरुत्कर्षवत्वेसत्य
पकर्षवत्वात्तामाधुर्यवत्। अतएवानित्यत्वमितिचेत्। न। तारत्वमंदत्वयोरुत्कर्षापकर्षयोगकारेपूर्वन्यायेनासिद्धेःसि
द्धोवाजातिसंकरभयेनउत्कर्षापकर्षयोर्जातिःसत्व शब्दत्वव्याप्ययोर्नानात्वेनरसमशब्दसाधारणजातत्वात्। अत
एवसजातीयसाक्षात्कारप्रतिबंधकतावच्छेदकसामान्यमुत्कर्षः तत्प्रतिबध्यसजातीयसाक्षात्कारविषयतावच्छेदकसा
मान्यमपकर्षइतिसाधारणोहेतुरपास्तः तारत्वादेर्गकारेऽन्यासिद्धेः साधनावच्छिन्नसाध्यव्यापकस्यमूर्तगुणत्वस्य

सिद्धनाथ

जाति

गुरु

अभावो ऽत्वस्य चाउपाधित्वात्। अप्रयोजकत्वाच्च। नहि करणाधीनपवोत्कर्षोपकर्षश्च परममहति परमाणौ च परिमाणे
प्रत्येकं सत्वात्। न सोऽस्तय ‌स्यपकत्रसत्वं कारणप्रयोज्यं एकवत् द्वयोरपि प्रत्येकमेकैकत्वात्। स्यादेतत्। भोत्रव्यापारानंत
र इदानीं कृतपूर्वेगिकारो नास्ति विनष्टः कोलाहल इति प्रतीतेः प्रत्यक्षमेव ध्वंसो नित्यत्वं विनाशित्वावत्वे नोत्पत्तिमत्त्वा
नुमतीनां प्रत्यक्षप्रतियोगिकाभावत्वे नहि प्रत्यक्षध्वंसस्य घटध्वंसवत्। ननु विनाशग्रहे प्रतियोगिसमवायिप्रत्यक्ष
त्वं तत्रं। धर्माभावस्य प्रत्यक्षत्वापत्तेः। तदिंद्रियग्राह्यपि प्रतियोगिसमवायिनि गंधस्याभावग्रहाच्च नो तयोगौरवात्। सू‌त
घटे संयोगध्वंसाप्रत्यक्षत्वापाताच्च। न च प्रतियोगियोग्य ... त्वस्य तंत्रत्वे वायुस्पर्शध्वंसोपि प्रत्यक्षः स्यादिति वाच्यं २
आश्रयनाशाजन्यस्य तस्य ग्राहकेंद्रियसंनिकर्षाभावात्। किं च यस्य सत्वं यत्रानुपलब्धिविरोधि तस्याभावस्तत्र गृह्यते
इति योग्यानुपलब्ध्यर्थः। अत एव पृथिवीत्वाभावो जलपरमाणौ न प्रत्यक्षः प्रत्यक्षश्च वायौ रूपाभावः। अस्ति च तथा शब्दे
तस्यत्वे सत्येव यानेव प्रतीतिप्रसंगात्। निरधिकरणाभावप्रतीतिर्नास्तीति चेत् न। इदानीं शब्दो नास्तीति प्रतीतेः। तस्मा
द्यत्राधिकरणोद्देशो समवायेवा प्रतियोगी वर्तते न तत्र तदभावो निरूप्यते। अत एव समवायाभावो निरूप्यत इत्युक्तं। शब्दाभाव

तदनु ३ स २

स्पस्य तरावैंद्रियसन्निकृष्टत्वान्नाश्रयसौन्निकर्षापेक्षा। इंद्रियविशेषणतया वा तावग्रहणमिति चेत्। न। अयोग्यत्वस्योपा
धित्वात्। अन्यथा गुणस्य स्वसंयुक्तसमवायेन दर्शनात् स्वसमवायेन शब्दग्रहः स्यादिति मेवं स्वनयवशाद्‌ व्यंजकविरहादनु
पलंभमात्रं न तु ध्वंसः। ननु व्याप्येतरसकलतदुपलंभसकसमवधानेन पलब्धिरूपयोग्यानुपलब्धेरसत्वात्। प्रतियोग्युप
लंभकव्यंजकवायोरसत्वात्। विनष्टप्रतीतिरपि त्वगिंद्रियोपनीतव्यंजकवायुस्पर्शविषयो पाधिकेव वायुर्नोत्पादकः किं तु व्यं
जकस्य त्वाकिं विनिगमकमिति चेन्न। इदानीमश्रुतपूर्वो गकारो नास्ति विनष्टः कोलाहल इति प्रतीत्यनंतरं पुनः श्रवणेऽश्रुतपूर्वो
वायं गकारस्स एव कोलाहल इति प्रत्यभिज्ञानमेव। घटध्वंसप्रतीत्यनंतरं स घट प्रत्यभिज्ञानमिति तत्र विनष्टप्रतीत्या
ध्वंस एव सिध्यति अत एव तार तारतरत्वमंदतरत्वप्रतीतीनां भ्रमत्वस्य कल्पनाद्वरं प्रत्यभिज्ञानमात्रस्य भ्रमत्व क
ल्पनमिति पराशस्ता। एतासु सैवेदमिति दृष्टप्रत्यभिज्ञानात्। स्यादेतत्। शब्दः प्रयत्नसाध्यः तदनभिव्यंग्यत्वे सति तदैतर नं ३
मुपलभ्यमानत्वात्। घटवत्। अस्ति व्यंजकत्वं हीन्द्रियसंबंधप्रतिबंधकापनायकत्वात् इन्द्रियसन्निधायकत्वाद्वा कु
ड्योत्सारितो नेव घटादीनां तदुत्पन्नमपि शब्देन संसर्गति निरस्तमवेतत्वे नैर्विरस्तापनयनसन्निधापनयोरसत्वाद्वा।

नी३ न५

मैद ४

नापिश्रोत्रसंस्कारात्। इंद्रियसंस्कारकस्यो नीलनालोकादेः समूहदिंद्रियसंबंधयोग्यस वर्णोपलब्ध्यनुकूलसंस्कारजनकत्वे
दृष्टे। तद्वद्वा पुरपि समूहदेवशब्दोपलब्ध्यनुकूलं श्रोत्रसंस्कारमादध्यात्। तथा च सर्वशब्दोपलब्धिः स्यात्। तदुक्तं॥
सकृच्च संस्कृतं श्रोत्रं सर्वशब्दान् प्रकाशयेत्। घटायोन्मीलितं चक्षुः पटं नाहि न बुध्यते॥१॥ अन्वयव्यतिरेकाभ्यां का
×जन्य४ र्यप्रतिनियतं जनकत्ववत्शब्देपि प्रतिनियतव्यंजकव्यंग्यत्वमितिचेत्। न। वर्णादिनप्रतिनियतव्यंजकव्यंग्याः पकावच्छे
देनसमान देशत्वे सतिसमानेंद्रियग्राह्यत्वात्। घटैकत्वपरिमाणवत्। नचावयवसंयोगवृत्त्वा व्यंजकव्यं ग्येनाव
यविनाऽत्पलत्वव्यंजकदीपा दीपा व्यंग्यत्वेन तन्नीलिम्ना घटवृत्ति पृथक्त्वव्यंजकव्यंग्येनैकत्वेन व्यभिचारात् अ 22
वयवसंयोगिावयविनो नीलोत्पलत्वयोश्च व्याप्या व्याप्य वृत्तिनो संयोगस्याव्याप्य वृत्तित्वे नोत्पलत्वस्य चाधिकदेश वृत्ति
त्वेनैकावच्छेदेनवृत्त्यभावात् बहुत्व पृथक्त्वव्यंजकव्यंग्यत्वंवावयव्येकत्वयोरितिनपरस्परव्यभिचारिव्यंजकव्यंग्यत्वौ अ
तएवनीलाबलाकेत्पत्र रूपपरिमाणयोरर्थनिरवातवंशासंख्यापरिमाणयोर्वानि व्यभिचारइतिमैवं। वर्णाः नियतव्यं
जकव्यंग्याः स्यामस्ये समानेंद्रियग्राह्यत्वात्। गंधवदित्यापाततः सत्प्रतिपक्षत्वात्। वस्तुतस्त्वाअन

प्रति॰

न्यथासिद्धप्रत्यभिज्ञा॰ वर्णानां भेदसिद्धौ प्रतिनियतव्यंजकध्वंग्यत्वसाधकस्यैव बलवत्वं। शब्दस्य शब्दजनकत्वे शब्दनाशकत्वे
वीचीतरंगन्यायेनोत्पत्तिकल्पनं वकल्पनमेवं शब्दस्य शब्दजनकत्वादनाकाशत्वाच्च। अंत्याद्यशब्दवत्। एतेन सामान्यवत्वे
सति अस्मदादिबहिरिंद्रियप्रत्यक्षत्वात् इत्यपास्तं। प्रत्यभिज्ञाना बाधात्। शब्दत्वगत्वादेरसिद्धेश्च। तस्मात् शब्दो नि
त्यो व्योमैकगुणत्वात् अनन्तपरिमाणवत्। श्रोत्रग्राह्यत्वात् शब्दत्ववत्। विशेषगुणांतरसमानाधिकरणैकवृत्तिगुणत्वात् समय
परिमाणवत्। पृथिवीतरानित्यवृत्तविशेषगुणत्वात् अपाकजत्वे सति नित्यैकसमवेतत्वात्। जलपरमाणुरूपवत्। अव्याप
प्यवृत्तित्वे सति अनात्मविभुगुणत्वात्। कालपरिमाणवत्। विपक्षे बाधकं च प्रत्यभिज्ञानमेवेति। अत्रोच्यते गकारादि
व्यक्तयोनेकाः। अस्ति हि शुकसारिकामनुष्यप्रभवेषु स्त्रीपुंसतद्विशेषप्रभवेषु गकारादिषु स्फुटतरवैलक्षण्यात्। स्वरूप
तो भेदप्रथा। इक्षुक्षीरादिमाधुर्यवत्। न चेयमौपाधिकी भेदप्रतीतिः। नहि अविदितकुंकुमस्य कुंकुमारुणतरुणीवक्त्रस्त्री ति
पुंसप्रभवत्वमानुमानिकमुपाधेः। इंद्रियासन्निकर्षेण स्त्रीपुंसादिभेदमविदुषोपि शब्दभेदप्रत्ययात्। यतो नु॰मापयति शु
कशब्दोयं स्त्रीशब्दोयमित्यादि। अन्यथान्योन्याश्रयात्। तत्प्रभवत्वे ज्ञाते भेदप्रत्ययः तस्माच्च तदनुमानमिति। न च रूपीणान्व

यथ्यतिरेकानुविधानदर्शनात्। कूपादिषु मुखदीर्घत्ववदेवोपपत्तेः क्रमोपाधिकत्वं अन्यानुविधानाभावात्। अथ व्यंजकवायोरेव गेलत्व
एवं श्रुकादिगकारगतत्वेन भासते वायोरनुपलब्धिस्तेनैव रूपेणेति चेत्। न। गकारगतत्वेन बाधकाभावात्। न च भेदप्रत्यभि
ज्ञानं बाधकं। नहि य एव शुकशब्दः स एव स्त्रीशब्द इति प्रत्यभिज्ञानं अन्यथा तेषु भेदज्ञानाभावेन वक्तृविशेषानुमा
नं न स्यात्। न चास्ति व्यंजकवायोरेव वैलक्षण्यं श्रुकाद्यनुमापकं तस्य गकाराद्भिन्नत्वात् तत्र चारोपेऽनुमितेर्भ्रान्तित्वापाता
त् तस्मात् यथा कृष्णो गौः शुक्लो गौरिति भेदे सामानाधिकरण्यानुगतप्रतीतिर्गोत्वमालंबते तथा श्रुकादिगकारेषु भेदे सा
माने ऽयं गकारो ऽयमपि गकार इति बुद्धिर्गत्वमालंबते प्रत्यभिज्ञा च भेदप्रथा चोपपद्यते किं च गत्वादिकं यदि न ज्ञातिः तदा
कोलाहलप्रत्ययो न स्यात्। तथाहि न गकारादौ वक्तृभिर्वर्णानामेकदोच्चारणे दूरस्थेनानभिव्यक्तगकारादिवर्णविशेषकं
कोलाहलमात्रं श्रूयते न च तत्र वर्णान्यस्य ध्वनिरूपस्य शब्दस्य श्रुतिः संभवति न दति व्यंजकत्वे दीर्घनादेरभावात्
न च वर्णास्ति व्यंजका एव ध्वनिव्यंजकाः सन्निधाने विश्रूयमाण वर्णेतरूपप्रसंगात्। न च वर्णास्ति व्यंजकवायुभिरेव दूरे ध्वनिमा
त्रं व्यज्यते [illegible] क व्यंजकस्य [illegible] ध्वनिव्यंजने ऽसामर्थ्यान्न तत्सामर्थ्यदीर्घत्वादेकाचाद्वा। न च तत्र

शब्दत्वमेव प्रतीयते न शब्दाव्यक्त्यग्रहे ज्ञात्यग्रहात् । न चास्मिन्पक्षे कवायुरेव कोलाहलत्वेन प्रतीयते । शब्दत्वे न प्रत्यासत्त्या सन्निधाव
पि तथा प्रसङ्गप्रसंगात् गकारादिग्रहेऽपि तेषां परस्परं भेदाग्रहात् कोलाहलधीरिति चेन्न । तेषु वैधर्म्याभावात् । तदभावेऽप्यन्यो
न्याभावस्याभावात् । स्वरूपस्य ग्रहात् समीपे तु कुगकारादिषु भेदाभावे तदग्रहे कोलाहलधीप्रसंगात् । अनेकवर्णाग्रहणास्य
नष्टत्वे दूरेऽपि तदप्रतीत्यापत्तेः । तस्मात् अवश्यं गत्वादिजातिस्वीकारे यदग्रहे गकारादिग्रहेऽपि कोलाहलबुद्धिव्यपदेशो असि
शब्दस्य कोऽपि जातिविशेषः श्रोत्रग्राह्यः यस्मात् तारमन्द्रादिदेशविशिष्टशंखप्रभवत्वमनुमीयते अव्यपदेश्यत्वेऽपि
इक्षुक्षीरादिमाधुर्यवितरवदतत्त्वात् । अन्यथा दिग्देशविशिष्टशंखादीनां ग्रहे श्रोत्रस्यासामर्थ्यात् प्रतीतिर्न स्यादेव । -
तथाविगत्वादिना परापरभावानुपपत्त्या शुकादिगकारेषु न तज्जातिविशेष इति चेन्न । शुकककारादिषु कत्वादिव्याप्या जातिर्भि
न्ना । न याप्यत्वे कैं शुकककारादिषु शुकादिप्रभवत्वमनुमीयत एव व्यवहारस्तु न तु शुककककारादिष्वेका जातिरस्ति शुकप्रभ
वत्वाद्यनुमापिका न व्यवहारकारिका वा गत्वादिना संकरप्रसंगात् गत्वं तु न नाना । अननुगतत्वेन ततोऽनुगतव्यवहारानुप
पत्तेः अत एव तारत्वमपि गत्वादिव्याप्यं नाना । ननु गत्वे तन्निश्चये किं गत्वसंदेहः एवं व्याप्यतावच्छेदकरूपा निश्चयात् ॥

नवानुगतव्यवहारानुपपत्तिः। सजातीयसाक्षात्कारप्रतिबंधकतावच्छेदकरूपत्वेनानुगतेन नानातारत्वेष्वनुगतव्यवहा
रसंभवात् तदज्ञाने व्यवहारासिद्धेः। तारत्वमंदत्वेन जातौ संकरप्रसक्तियौगिकत्वादिति चेन्न। न तारत्वादयो उत्कर्षरूपा जातिवि
शेषा एव ते [illegible] ग्राह्यमाणा एव गृह्यन्ते न तु उत्कर्षो व्यपेक्षाः। यथा मधुरत्वादयो उत्कर्षव्यवहारं इतररसापेक्षाः कु
र्वन्ति तथा मंदाद्यपेक्षया तारत्वादिव्यवहारं उत्कर्षश्च जातिरूपात् अन्योऽसंभावित एव गकारे तु नैवं अनन्यथासि
द्धत्वेदप्रत्ययबलेन वस्तुविशेषानुमानबलेन वा तत्सिद्धेर्गत्वकृतत्वव्याप्यतया तन्नानात्वस्वीकारात्। न चापि वायुध्व
क ५ क्तित्वेऽशुकादिकारगकारादिव्यंजकवायूनां वैजात्यं वाच्यं। तथा च व्यंजकवायुत्वव्याप्यं यदि शुकवर्णाभिव्यंजकवायु २८
त्वं तदा शुकगकारादिव्यंजकवायौ स्यात्। अथ व्यापकं तदा सर्वेऽप्येकव्यंजकवायवः शुकवर्णाभिव्यंजके वायवः
स्युः। न स्यात् वायुव्यक्तित्वेऽपि तासां नानात्वमावश्यकं। अथास्तु स्त्रीपुंसादिगकारस्तेदस्तथापि प्रतिवस्तु स्तेदासंमं नीता
एव नित्याः वर्णाः प्रत्यभिज्ञानादिति चेन्न। अस्मदुत्पादविनाशप्रतीतौ सत्यामपि स एवायं गकार इति प्रत्यभिज्ञा। अस्ति
च तदनंतरमप्युत्पादविनाशप्रत्ययावी। न चोत्पादिप्रतीत्यस्तेदप्रत्यभिज्ञानयोरन्यतरस्य परस्परं विरोधाऽन्यतरबाधकम

कमस्ति। न वा नयोः परस्परबाध्यबाधकभावे विनिगमकं। येनैकस्यां तत्त्वेनाविरोधः स्यात्। कथं भेदाभेदज्ञानयोरन्यतर
त्राववाधित्वं परस्य प्रतिबंधकत्वं परिकल्प्य प्रथमं तयोरेकसत्त्वेपि अपरोत्पत्तिरस्त्येवेति संकटप्रविष्टतया प्रत्यक्षज्ञानं
शाब्दनिरपेक्षे प्रमाणयितुं न शक्यते। नन्वेवं उत्पत्तिमत्त्वादिनाप्यनिरपेक्षत्वसिद्धिः कथं उत्पादादिबुद्धिप्रत्यक्षज्ञान
योरवश्यं विषयभेदः एकविषयत्वेनैकान्तरस्य परानुत्पत्तिप्रसंगात्। एवं च भेदे भासमाने प्रत्यक्षज्ञाया स्तज्जातीय
स्यैव विषयो न वा अस्य भेदः। न चैवं तज्जातीयो यः स्यात् न तु सोयमिति वाच्यं। तज्जातीयप्रतीतेरपि सोयमित्याकारदर्श
नात्। यथा सैवेयं गाथा। तदेवेदमौषधं बकुलं स्फुटं मयापि प्रत्यहं क्रियमाणमस्तीत्यादौ। नहि तावद्वर्तमानमात्रमानु
पूर्वी गैरायाज्ञानदीदीनादिषु तन्त्रानात्वात्। किंतु तदुच्चारणानंतरं उच्चारणे तज्ज्ञानानंतरं तज्ज्ञाने वा तज्ज्ञानेतिवद्गी
ताथापि नानेव। न चाभेदे भासमाने उत्पादादिबुद्धेरवाऽन्यस्योत्पादादिकमवगाहते गकारादिगतत्वप्रतीतेस्तत्त्वप्रसंगात्।
ता। न चैष्टापत्तिः। अभेदे भासमाने तं [illegible] मत्वस्य स्वमानुदयात्। विनिगमकाभावेनोभयस्यापि यथार्थत्वात्। कि
न्तर्हि तस्याभेदो विषयः यत्र प्रथमं न भेदप्रथा। अत एव भेदभ्रमत्वे तदज्ञानान्तर्भावित्वांता तस्मात् यत्र भेदप्रतीति

पि२

25 त्यादितर बाधका बाध्या। तत्र प्रथमे प्रत्यभिज्ञैव न नत्तवदित्सवंतीनात: ज्जातीयत्वमालंबते। ननु त्वां ताविशेषदर्शनित्यमानु
दयात् अपि च यथा शंखादिध्वनीनां उत्पत्तिविनाशप्रसंग्यात् तारत्वादिविरुद्धत्वे धर्मसंसर्गध्वानित्यत्वे सेयं गुर्जरीसा
इति प्रत्यभिज्ञा तज्जातीयत्वविषया तथा वर्णप्रत्यभिज्ञापि अन्यथा ध्वनयो निरासः स्युः उत्पत्तिविनाशतारत्वादिप्र
तीतीनां प्रत्यभिज्ञाबलेनौपाधिकत्वात् न च वर्णेषु तारत्वेन च व्याप्यमाना ध्वनयः प्रायशः संभवंति। न हि ध्वनिषु वर्णाः।
तज्ज्ञानक के [illegible] तालव्याः हीयते ध्वानानावादितिवाच्यं। वर्णोच्चारणादध्यायामविषयगर्जरीकोदिजनकानामसंभवात्। तस्मात् २५
उत्पत्तिविनाशतारत्वादिप्रत्ययस्य प्रत्यभिज्ञानस्य च तुल्यत्वे द्वयोरपि नित्यत्वमनित्यत्वं। न चोभयोरपि नित्यत्वमेव तत्कल्
प्यायेन प्रत्यभिज्ञायाः तज्जातीयत्वविषयत्वात्। किंच यदि शब्दः स्यात्। न दाबाह्यालोकाभावे घटस्येव व्यंजका
भावेशब्दस्यानुपलंभात् संशयः स्यात्। ननु इहेदानीं शब्दो नास्तीति निश्चयः। तस्मात् वर्णा नानित्या नित्या वा स
मवेतत्वे सति उत्पत्तिमत्त्वात्। अस्मदादिबाह्येंद्रियग्राह्यत्वे सति जातिमत्त्वाद्वा। अस्मदादिप्रत्यक्षगुणत्वाद्वा:
आत्मैकत्वप्रसक्तेः त्वपक्षे विशेषगुणत्वात् व्यापकसमवेतप्रत्यक्षविशेषगुणत्वात्। अनात्मप्रसक्तगुणत्वात्।

ग्रंथ: ४

नस्यप्रतिबंधकत्वात्। व्याप्तिधीविरहे न तत्रापि अनुमितिप्रतिबंधकानैकान्तिकज्ञानवत्। अन्यथास्य कृतिसाध्यता
निष्टसाधनोपेक्षणीयत्वनिःफलत्वज्ञाने प्रतिबंधकं। क्रियाज्ञानमेव प्रवर्त्तकं कल्प्येत। ननु सतो धात्वर्थगोचरेच्छा
वाचित्वात् लाघवात् [illegible]कृताविच्छा चिकीर्षा सा च बलवद्द्विष्टानिष्टसाधनताज्ञानादिति चेन्न। वह्निना साधयामी
तिवत् कृत्या साधयामीति इच्छायाः कृतिपूर्वमनुभूयमानायाः सत्त्वं तावता धात्वर्थे न गौरवेणापि च प्रत्ययार्थत्वानु
मशक्यत्वात्। किं च पाकं चिकीर्षतीत्यत्र प्राधान्येन पाकस्येच्छाविषयत्वं अनुभूयते न तु कृतेः धात्वोऽस्य सन्
प्रत्ययाभिधेये इच्छाप्रकारत्वात् विरोधी। ओदनं भोक्तुं बुभुक्षते सम्भोजनविषयतयोदनेऽपि विषयत्वानुभवात्।
इष्टसाधनताज्ञानेन वृष्ट्यादिविषयकृताविच्छायाः सत्त्वेपि कृतीच्छा न प्रवर्त्तिका किं तु कृतिसाध्येच्छैव घटं जाना
ति चिकीर्षति। करोतीति ज्ञानचिकीर्षाप्रवृत्तीनामेकविषयत्वानुभवात्। अथ यदि कृतिसाध्यताधियं विनेच्छा
सा। तदा चिकीर्षितस्य पाकस्यान्यतः सिद्धौ सा नापगच्छेदत। नहि उपायविषयसाध्यत्वे नेच्छोपायान्तराधीन

33

फललालसेनिवायति। प्रीतौ धनलालसेपि प्रतिग्रहेण तद्धिस्यायाऽनुवृत्तेरिति चेत्। स्वविषयासिद्धस्यफलेच्छा
विच्छेदस्य चोपायेच्छाविरोधित्वात्। अस्ति च तत्र पाकोदनयोः सिद्धत्वं। अन्योदनेच्छायां पाकचिकीर्षास
त्वेपि च प्रकृतासिद्धत्वात् कृतावेवेच्छानविच्छिद्यते यदि कृतिविषयसिद्धत्वफले फलेच्छाविच्छेदेन विरोधि
नो प्रीत्या धनलालसे तत्र दधिकर्पयोच्छानविच्छिद्यते। न स्यात् सिद्धत्वात्। तन्न फलेच्छायाश्रुत्वात्। धनमात्रा
र्थिनः प्रतीत्यातल्लालसेन प्रतिग्रहेण तद्विघ्नान्नास्त्येव धनमात्रस्यासिद्धत्वात्। किंचित् तद्विशेषस्याविच्छेदेव
सामान्येच्छाविच्छेदः। अन्यथा सकलस्याविषयासिद्धेरसंभवेन तद्विच्छेदानस्यात्। दैव। वस्तुतस्तु क्रि ३३
यानुकूलाकृतिरिष्टोपाय इति ज्ञाने क्रियायाः कृतिसाध्यत्वमिष्टोपायत्वं तं क्रियाद्वारैव कृतेरिष्टसाधनत्वा
दित्यनन्वोध्यात् कृताविव कृतिसाध्यत्वेन क्रियायाः मपि सैवेष्टेति चिकीर्षायां कृतसाध्यत्वप्रकारकत्वे
प्यसौ। अतः कृतिः समानविषयी विषयविधिकाविर्त्वेन चिकीर्षायाः कृतिकारणत्वं। ननु कृतीच्छात्वेनास्तिन्वविषय

तयागौरवात् तथापियेनरूपेणयस्येष्टसाधसाधनत्वं तेन प्रकारेणात्रेच्छा यथा स्वकेदारत्वादित्वेनेष्टसाधनत्वात्तन
थैवे[illegible]। तथा कृतिसाध्यत्वेन पाकस्येष्टसाधनत्वं अतः कृतिसाध्यत्वेनात्रेच्छास्त्ववलीति कृतौ। कृतिविषये छो
बाधिकीर्षायां न दृष्टीच्छा विलक्षणासामग्र्यंतरकल्पनमिति चेन्नैवं देवं यदि कृतिसाध्यत्वेन पाकस्येष्ट
साधनतास्यात्। नचैवं गौरवात् किंतु पाकत्वेन सत्तु कृतिं विनानेसत्त्वदेतत्। वह्निनासाध्यकामी तिवत् कृसासाधय
मीतीच्छा इष्टसाधनताज्ञानादेवेति चेत्। तर्हि तत्र वह्निसाध्यताज्ञानवदन्नादि कृतिसाध्यत्वज्ञानकारणमावश्यकं।
कृतौ वानुमतवासिद्धं चिकीर्षाधीनत्वं विशेषः तेन नापार्थिवकसंचारे जीवनयोनि कृतिसाध्येन न प्रवृत्तिः। अन्यथा कृति
साध्येष्टसाधनतापक्षेपि तत्र प्रवृत्तेरिति। ननु चिकीर्षाधीनत्वस्योपलक्षणत्वे उपलक्षणमात्रगतानतिप्रसक्तिधर्मा
भावात्। कृतिमात्रस्य चातिप्रसंगात्। तत्रत्यकृतिविशेषाउपलक्षणाः। तथा च तदननुगमात्। प्रवृत्त्यननुगमः विशेषण
त्वे चिकीर्षायां प्रवृत्तौ च चिकीर्षाज्ञानकारणत्वे गौरवं प्रमाणाभावश्च। किं च चिकीर्षासाध्यावच्छायोः कृतेः सिद्धावस्थ

35 साधनत्वविरोधेन कृतिसाध्यतापाकादौन ज्ञायेतेति चेन्न। अस्ति हि कृतिविशेषो मानसप्रत्यक्षसिद्धो जीवनयोनियत्न
व्यावृत्तः स्थविकीर्षापरूस्यः। यत्र चिकीर्षया कारणत्वग्रहः स च तज्जातिरूपो ममत्वनुगतकारणोपाधिरूपः। एवं च चि
कीर्षाधीनत्वेनानुगतेन कृतिविशेषाणामनुपलक्ष्याणामनुगतत्वमपि. यथा गोत्वेन तटस्थेन अडपलक्षितानामहिष्यादि
व्यावृत्तव्यासाधनकर्मव्यक्तिविशेषाधेनुपदेनोच्यते। ननु गोत्वमपि तथा चिकीर्षामपि एवं जीवनयोनिव्यावृत्तकृतिविशे
षाणां कृतित्वेन ज्ञानं कारणमिति वाननुगमः। ननु कृतिसाध्ये कृतित्वविशेषबुद्धेरसत्त्वात्। तत्त्वेनाकृतौ सत्यां ज्ञा
नेज्ञानेन कृतिरिति सत्योऽन्याश्रयः। नोपलक्षणमति प्रसंगादिति चेन्न। कृतिर्हि ज्ञानेविषयतया विशेषणमेव साध्ये व्यप २६
रिवारकतयाउपलक्षणे। अन्यथाइष्टसाधनेपि इष्टनविशेषणे प्रसत्त्वात् नोपलक्षणेअतिप्रसंगात्। लिंगज्ञानादो
वाकागतिः। नन्वेवं [illegible]मेपि चिकीर्षास्यात्। तस्याश्चिकीर्षाधीनकृतिसाध्यत्वात् [illegible] मस्तके लोजनादि क्रियासाध्यो
न तत्कृतिसाध्योचिकीर्षितत्वात्। अतः स्वधर्मसमासान्तकारातिरिक्तेचिकीर्षाविषयमात्रेजनकत्वात्। नहि लोजनादि चि
कीर्षाधीनकृत्यागमनं साध्यतइति केचित्। न गुरुतरत्वारात्रोत्पन्नेकृत्यसाध्येत्र मातृप्रवृत्तस्यानिष्फलविषयानिग
प्रवृत्तिः। त्रे

ऽदेहस्य वा कृतौ कृतौ सत्यामुत्तोलनवलनक्रियानुत्पादेपीच्छामनुसृत्य वा कृतेरेव कारणत्वात् ननु तज्जन्यक्रियायाः सु
खे व्यभिचाराद्वा नहि सुखे कृतिः कारणं सौखिकी चिकीर्षाविषयः। उपायचिकीर्षाजन्या हि कृतिः ननु सुखचिकीर्षाजन्या चि
कीर्षाजन्यकृतिसाध्यत्वं न त्वभेद्वषयो नियत्नादापि न दुत्वान्निदित्यपरे। तन्न। शत्रुवधस्येष्टसाधनत्वे न चिकीर्षा
जन्यकृतिसाध्यत्वात् द्वेषस्य प्रयत्नाजनकत्वात्। द्वेषासिद्धिः स्फुरात्ते द्वेषीमीत्यनुभवबलात्। यत्तु श्रमः कृति
त्वेन कृतिसाध्यो न चिकीर्षाधीनकृतित्वेन यद्याचिकीर्षितं विश्रममेव चिकीर्षाधीनकृतित्वेन कारणतास्यात् त
दा चिकीर्षितमेव स्तोजनं कृत्या साध्यते न त्वचिकीर्षितं गमनादीनि न स्यात् श्रमस्यानागमने जनतज्जन्यत्वप्रसंगात्
स्तोजनादिप्यचिकीर्षाधीनकृतिविजात्। स हि कृतिमात्रं व्यभिचरति। जीवनयोनिकृतेः तदनुत्पादनात्। यद्वा। श्रमो नस्तो
जनादि कृतिसाध्यः किंतु निरंतरस्य जीवनयोनियत्नादेरिति। तन्न। नहि कृतित्वेन तत् श्रमजनकं। नापि कृत्यैतरादेवश्र
मोत्पत्तिः जीवनयोनियत्नस्य सुप्तस्य पि[illegible]शिद्धहनादिकमकुर्वतस्तादृशश्रमानुत्वेन न तस्य श्रमजनकत्वं श्रमविशेषाणामपि
स्तोजनकृतिसाध्यत्वमनन्यगतिकत्वात्। सुप्तस्य स्वेदाद्यनुमितश्रमतज्जन्यदृष्टिर्वत्न। न। स्वेदादेः श्रमान्यहेतुकत्वात्। अन्य

ततस्मात् २

विं०श्री०

३५ धाजाग न्वावउपन्नर ... ति श्रमे सादिकि ... मेरथच्छा ... धीनत्वस्य कृतिविशेषणत्वात् । अनश्वनियमगोनेच्छाधी
35 नकृतिसाध्यः श्रमे दुःखत्वेनेच्छाविरहात् । अत एवानेच्छाजन्यकृतिसाध्यत्वेन श्रमो नान्तरीयक इत्युच्यते । स्वविकीर्षाधीनत्वेन कृ-
तेर्न विशेषणं । गौरवात् । अन्येत्वकृतिगतेधर्मंतिरस्मेवोद्देश्यत्वात् । तद्विशिष्टकृतिसाध्यश्च न श्रमोऽविकीर्षितत्वात् । किन्तु कृ-
तिमात्रसाध्यः । अत एव कष्टं कर्मेत्यनुभवो लोकानां । एवं हि विकीर्षायां ममैकं कृतिसाध्यत्वं प्रयोजकं न तु कृतिसा-
ध्यत्वे सतीष्टसाधनत्वं सुखत्वं दुःखाभावत्वं वेति वक्तुं युक्तं इच्छाप्रयोजनं मम सुखत्वं दुःखाभावत्वं वेति । ध्येयं ॥ ३५
इष्टसाध्ये सुखे हीच्छा कृतिमपि विषयीकरोति । न त्विष्टसाधनत्वेन तत्रेच्छा साधनत्वस्येच्छाविरोधित्वात् ॥
न तु तद्वये विषभक्षणे कृतिसाध्यत्वेपि बलवदनिष्टसाधनत्वेन विकीर्षा नास्तीति कृतौ चिकीर्षान्यत्वं । पी
विशेषणमिति कश्चित् । तन्न । एवं हि विषभक्षणे कृतिसाध्यमेव न स्यात् । जीवनयोनिकृते स्तस्यानुपपत्ते

रितिव्यर्थं विशेषणत्वं। स्यादेतत्। इष्टसाधनतात्वमनिषत्तलक्षणे वैस्य वेदनेन चिकीर्षाजन्यकृतिसाध्यत्वमस्ति
ज्ञानप्रयुक्तत्वात्। कार्यत्वस्य तथात्वसंज्ञानबाधेपि तत्र कार्यत्वज्ञानात् प्रवर्त्तेतेन न तथा तन्नो पिभोजने। ननु कृ
तिसाध्यतानुभवस्तथा। अन्यथेष्टसाधनतास्मरणेपि प्रवर्त्तेत। नचेष्टसाधनताज्ञानं वेदो वानुभावकमस्तीति चेत्
न। वस्तुतस्तु न कृतिसाध्यत्वे लिंगोतरेणाप्रवाक्येन वा तदनुभवसंभवात्। लिंगाभासात्शब्दाभासाद्वा। अप्र
कृतिप्रसंगाच्च। सेदाग्रहवादिनस्तु न तदनुभवाभावात्। मैवं। स्वविशेषणत्ता प्रतिसंधानजन्यं हि कार्यताज्ञानं प्र
वर्त्तकं। तथाहि। काम्ये पुरुषविशेषणं कामना ततः काम्यसाधनताज्ञाने न यागादौ कार्यताज्ञानं। नित्ये च कालपौ
चादिस्वविशेषणं। तथा चैत्संध्यायामहं कृतिसाध्य[illegible]संध्यावंदनं संध्यासमयशौचादिमत्वात्। पूर्वसंध्या
यामहमिवेतिकार्यताज्ञानं शौचादिस्वविशेषणज्ञानजन्यं। तदुक्तं। स्वकार्यविशेषः पुरुषविशेषणवगतः प्रसक्तिहेतुरिति
संज्ञानबाधस्य चविषत्तलक्षणे वैस्य वेदनेन सत्त्वमदृष्टाया मिव तेष्टसाधनताज्ञानमस्ति येन तज्जन्यकार्यताज्ञानात्प्रवर्त्त—

विं॰शा॰मू॰

३६ ते। न तस्य फलेच्छाकामनाविरहेणेष्टसाधनतावात् न तथा बोधः॥ अन्ये त्वाहुः नो जीवित्वप्रतिसंधानजन्यं श्रमे कृ

३८ तिसाध्यताज्ञाने सैव न तीति जीवनव्यतिरिक्तैः स्वविशेषणैर्विशेषणानि मित्राणीति। तन्न। श्रमेस्येष्टाजन्यकृति

साध्यत्वाभावात्। इष्टसाधनतालिंगकं कार्यताज्ञानं प्रवर्त्तकमित्यपरे। तन्न। नित्ये तदभावात्। ननु वि

षयलक्षण्या वृत्तिमिष्टसाधनत्वमेव कृतिसाध्यताज्ञाने विषयतया विशेषणमस्तु। स्वविशेषणवत्ताज्ञा

नजन्यत्वात् लघुत्वात् किं च उपायविषयाचिकीर्षा इष्टसाधनताज्ञानसाध्या। उपायेच्छात्वात्। दृष्टीच्छावत्। २६

भोगचिकीर्षायां तदभावात् अप्रयोजकमिष्टसाधनत्वमिति चेन्न। न। न वा विविशेषणधीजन्यत्वात् तावे न

तत्र तस्याप्रयोजकत्वात्। कृतिहेतुचिकीर्षायां तत्प्रयोजकत्वं। न च भोगचिकीर्षा तथा। उपायचिकीर्षा तु एव च

तिसंस्तत्वादिति वेन्ना। ना तुल्यमिति। मैवं। साध्यत्वसाधनत्वयोर्विरोधेनैकत्र ज्ञानुमशक्यत्वात्। असिद्धावस्

स्यहि साध्यत्वं। सिद्धतादशायां तदभावात्। सिद्धतादशायां च साधनत्वं। असिद्धावस्थातः कार्यनिष्पत्तेः

गम्या ३

तथा च पाकादेरसिद्धत्वसिद्धत्वज्ञाने साध्यत्वसाधनत्वग्रहः न चैकमेकेन एकदासिद्धमसिद्धं चेति ज्ञायते। न च स्वरूपग
तता। साध्यत्वसाधनत्वयोः अतो न विरोध इति वाच्यं। यद्धि हि स्वरूपनिबंधनं तदुत्पत्त्यैव तत्स्वरूपेण तदेव सिद्धम
सिद्धं च स्यात्। भिन्ननिरूपितत्वेपि तयोः सिद्धत्वासिद्धत्वे न वै ज्ञानात्। तस्मात् समयभेदोपाधिकमेतदु
२४ भयसंबंधः पाके। इदानीं साध्यं मग्रे च साधनत्वं ज्ञायत इति चेत्। नाइदानीमग्रिमपदार्थयोर्भिन्नत्वेनानुग
मेन व्याप्त्यग्रहात्। शब्देन तथा प्रतिपादयितुमशक्यत्वात्। गौरवाच्च। न च कृतितः सिद्धमिष्टसाधनमिति ज्ञा २
नात् चिकीर्षा। न हि सिद्धं कश्चित् चिकीर्षति। कृतेः पूर्वं कृतितः सिद्धमिति ज्ञानासंभवात्। न च कृतिसाध्यत्वे
न पाकादेरिष्टसाधनत्वमपि साध्यं। न हि कृतिसाध्यत्वेन पाकस्यौदनसाधनत्वे सकृते। तस्मात् कृतक्रि
यमाणाविलक्षणकृत्यनंतरभाविष्यतारूपत्वं कृतिसाध्यत्वं चिकीर्षाप्रयोजकं। नाइष्टं च साधनत्वाविरोध्ये
व किंच साधनत्वस्यासिद्धतामात्रधर्मत्वात्। साधनत्वज्ञानमिच्छाविरोधि न हि कश्चित् असिद्धमिच्छतीत्युक्तेः।

37 एतेन कृष्यादौ इष्टसाधनताज्ञानमुपायेच्छाकारणत्वेन क्लृप्तमिति निरस्तं। कथं तर्हि स्वतोऽसुन्दरे कृष्यादौ वि-
च्छा। तत्साध्येष्टज्ञानादिति गृहाण। अन्ये तु सुखदुःखाभावतत्साधनेष्विच्छा। प्रयोजकमनुगतमुद्देश्यत्वं
पुरुषार्थपदवेदनीयं धर्मान्तरमस्ति। अनुगतकार्यस्य अनुगतकारणनियम्यत्वात्। तदेव दुःखतत्साधनव्यावृत्तं
सुखतत्साधनादौ चिकीर्षाप्रयोजकमिति। न च दुःखविरोधित्वेन तथास्त्विति वाच्यं। सहानवस्थाननियम[illegible]विरो
३७ भाव॰प्र॰ धस्याप्रसिद्धत्वात्। वध्यघातकस्यैकसमये सामानाधिकरण्याभावस्य च यत्नादिसाधारणत्वादिति। तन्न। तदज्ञाने 37
पि सुखत्वज्ञानादिच्छोत्पत्तेः। न हि सुखे ज्ञाने कर्मान्तरज्ञानं विनानेच्छा। तथात्वे स्वतः प्रयोजकत्वहान्यापत्तेः। तदेव
हि स्वतः प्रयोजनं यदवगते सत्स्वत्र्छितये भवेत्। किं चानुगतधर्मकल्पनापि कारणे। न च सुखादीच्छाकार्यं अनागत
त्वात्। किं तु तदवगमः। तर्हि सुखादिज्ञाने तत्स्वरूपसदैवेच्छाप्रयोजकमस्तीति चेत्। न। यथाशुद्देश्यत्वे सुखज्ञानादि
भूत्यर्थे। अन्यतरत्वात्तत्कारणमिति न्यायात् [illegible] वैज्ञायतां। कृतिसाध्यत्वेव कृतौ स सामग्रीमध्यगतं स्वरूपं न[illegible]
च्छा॰

तिं विना दोहनसाधारण्यं वैतन्न कृतिसाध्यत्वेन कृतेः पूर्वं ननु कृतौ नष्टायां स्वापि धर्मी न कार्यः। तथा च कथं कार्ये इष्ट-
वैकाम्रिनोन्वयः। जातिकत्वे न क्रियानुत्पत्त्यादिति। न। यद्वृत्ति काम्य साधनत्वे तत्र कार्यता बुद्धेः प्रयोजकत्वात्। ननु
कार्यता विशिष्टस्य काम्यसाधनतेति व्याप्तिः। ननु पा[ ]कादौ कृतिसाध्यताज्ञानं न प्रत्यक्षेण कृत्यनंतरं पा-
के सति साध्यताज्ञाने तस्मिन् सति कृतिरित्यन्योन्याश्रयात्। कृतिसाध्यता[ ]नीलोचिकीर्षा कृत्योः सत्त्वाच्चेतिचेत्
न। पाको मत्कृतिसाध्यः मत्कृतिं विना ऽसत्त्वे सति मदिष्टसाधनत्वात्। तादृशं वा यद्धीनत्वे सति मदिष्टसाधनत्वा-
द्भोमत्स्यौ जनवदित्यनुमानात्तस्य च कृतिसाध्यताज्ञानं। यस्य यदिष्टसाधनं यत्कृतिं विना यदा न सिध्यति तत्
तदा कृतिसाध्यमिति व्याप्तेः। असिद्धस्येष्टसाधनत्वा[ ]भावात्। बलवदनिष्टाजनकत्वं च लिंगविशेषणमिति न
मधुविषसंपृक्तान्नभोजने न व्यभिचारः। अतीतपाके कृतिसाध्यतोन्नीते च न व्यभिचारः। सामान्यत

38

स्तस्यापि कृतिसाध्यत्वात्। अतीनतादृशार्थी वातीनोदनेच्छाविरहेणाहृष्टसाधनत्वाभावात्। बलवदनिष्टा
अतएवानिदाघदृनेदाहोवर्षति दारिद्रे तोयार्थी नो यत्नात् तसंभावनापी सरोवगाहनेन प्रवर्त्तते इष्टसन्ता
पशीतिसाधनस्यतोयसंबंधस्य कृतिं विनापि सिद्धिप्रतिसंधाने लिंगाभावेन स्वकृतिसाध्यताज्ञाना
भावात्। यदा वमत्कृतिं विनासनसंभवातीति प्रतिसंधत्ते तदा प्रवर्त्तते। यस्य सन्तापशीतिमात्रमिष्टं स स
रोवगाहनस्येष्टसाधनत्वमेव न प्रतिसंधत्ते। उपस्थितं न्नष्टितोपि तत्संभवादिति कश्चित्। तन्न। तोय ३८
संबंधत्वेन सन्तापशीतिसाधनत्वात्। तस्य च सरोवगाहनेपि सत्वात्। अन्यथा वृष्टिरपि तत्साधनं न स्यात्।
सरोवगाहनादपि तत्सिद्धेः। कार्यसाधनत्वे च कृत्यसाध्यत्वे नालिंगी। पाकादिव दोदनादावपि प्रवृत्तेः
पूर्वकृतिसाध्यत्वज्ञानेहत्वभावात्। नन्वेवं लिंगज्ञानमेव प्रवर्त्तकमस्तु। प्राथमिकत्वात्। आवश्यकत्वा

द्वा नबलाद्यवात्कृतिसाध्यत्वज्ञानं तथा कृतिसाध्यत्वानुमितौ न दामानात्तावेन युगपदुपस्थितसंभवात्। प्र
वृत्तिसामग्र्या अनुमितिप्रतिबंधान्नोत्पत्तिरिति चेन्न। लिंगज्ञाने कृतिसाध्यत्वाप्रकाशेन तत्प्रकारकचिकीर्षायां
तस्या हेतुत्वात्।। अत एव लिंगांतरज्ञानमपि न प्रवर्त्तकं। ननु पाकादिकृतेः क्रियमाणो वा न पक्षः तस्य
कृतिसाध्यत्वे बाधात्। नाप्यनागतः स विषयत्वाप्राके मानाभावेनाश्रयासिद्धेः। पाकत्वं तद्विषयवृत्ति
सामान्यत्वात् गोत्ववदिति मानमिति चेन्न। मानाभावेन गोत्वेऽपि तस्याप्रसिद्धेः। पाकमात्रं पक्ष इति चेन्न।
नामात्रार्थो यदि पाकत्वं तदा बाधो लिंगासिद्धिश्च। सर्वपाकपरत्वे च तस्य सिद्धस्यांशे बाधः। अनागतेरा
श्रयासिद्धिः। वर्त्तमानाद्युदासीनः पाकः पक्षः पाकसामान्ये च कृतिसाध्यत्वं न बाधितमिति स्यापि न
सिद्धस्य पक्षत्वं नासिद्धस्येत्यनुमितौ सिद्धविषयत्वे बाधात्। सि…ध्यविषयत्वे वासिद्धविषये च्छा प्रवृत्त्यापाद्य
नुत्पादकत्वाच्च। एतत्क्रियमाणसाधारणत्वो कृतिसाध्यत्वज्ञानादेवासिद्धविषयाचिकीर्षा कृतिश्चोत्पद्य

39 (नुत्पादकत्वाच्च। कृतत्रि यमाणसाधारणकृतिसाध्यत्वज्ञानादेवासिद्धविषया चिकीर्षा कृतिश्चोत्पद्यते अन
न्यगतिकत्वेन तथाकारणत्वस्याकल्पनात् इति चेत्। तर्हि यादृशे कृतिसाध्यत्वे चिकीर्षायाः प्रकारस्तादृश
ज्ञानेनास्तीत्यन्यप्रकारकज्ञानादेव चिकीर्षा स्यात्। तथा च लिंगज्ञानमेव प्रवृत्तिहेतुः सत्वप्राथमिकत्वात्
यत्तु स्मृतपाके कृतिसाध्यत्वासंसर्गाग्रहात् प्रवृत्तिः स्यात् संसर्गाग्रहः इष्टसाधनताज्ञानादितो तन्न।
स्मृतपाकस्य सिद्धत्वेन तत्र कार्यत्वासंसर्गाग्रहेऽनुमानबाधात्। स्मृतपाकस्य सिद्धत्वं तदानग्रहीतर ३८
मिति चेत्। तर्हि स्मृतपाकस्य सिद्धत्वग्रहे ददनार्थी पाके न प्रवर्तेत सिद्धोदनोऽपि पाके तदन्योऽपि भोजने प्रवर्तेत
तत्र पाकादौ सिद्धत्वग्रहात् न तदसंसर्गाग्रह इति चेत् न। तुल्यं। अपि च स्मृतपाके कार्यत्वासंसर्गाग्रहाद्धि घ
मानासंसर्गाग्रहात् द्विसंवादिनी प्रवृत्तिः स्यात्। किं चैवं सिद्धत्वज्ञानात् अज्ञातेऽसिद्धे पाके इच्छाप्रवृत्ती स्या
तामिति। अत्र ब्रूमः। पाके कृतिसाध्यत्वे सिद्धासिद्धे बाधादनागतपाकमादाय सिध्यति। पक्षतावच्छेद

कधर्मसामानाधिकरण्येन साध्यमानस्य लिंगेन सिध्यतीत्यनुमाने कुत्रत्वात्। यथा सिद्धवह्निबाधेपि वह्निमात्रं
न बाधितमिति सिद्धो विवह्निः सिध्यति। तथा प्रसिद्धपाके कृतिसाध्यत्वबाधेपि पाकमात्रं न बाधितमिति प्र
सिद्धपाकमादाय सिध्यति। अप्रसिद्धयोः पक्षसाध्ययोः सिद्धावविशेषात्। तस्मादसिद्धस्य क्वचित्सिद्धे
सिद्धे सिद्धस्य क्वचित् अप्रसिद्धस्य वा सिद्धे सिद्धिस्तेनानुमा त्रिधा। अन्यथा कृतिसाध्येष्टसाधन
तापक्षे दिपाकादौ कृतिसाध्यत्वं कथमवगम्यते किं च न वापीष्टसाधनताज्ञानात् कथं तृप्त्यादाविच्छा सि
द्धत्वस्येच्छाविरोधित्वात्। अनागतस्य ज्ञातुमशक्यत्वात्। अत एव सिद्धासिद्धविषयत्वनिरासे न सुखा
दिज्ञानात् फलेपि नेच्छेति न तृप्त्यादाविच्छसाधनतापि न च तृप्त्यादि साध्येष्टसाधनात् तृप्त्यादाविच्छाद
च्छायाः सिद्धासिद्धतृप्त्यादितत्फलविषयकल्पनासात्। अथ सामान्यलक्षणाप्रत्यासत्त्या तृप्त्यादित्वे
न वा सिद्धासिद्धतृप्त्यादितत्फलविषयकज्ञानमुत्पन्नीते न सिद्धविरोधित्वं सत्त्वासिद्धविषयेच्छोत्पद्य

50 ते यदि व्यासामान्यलक्षणा नास्ति तदा येन रूपेणेष्टसाधनताग्रहस्तेन रूपेण ज्ञातेऽसिद्धेव इच्छोत्पद्यते । अन्वयव्यतिरे
काभ्यां नीताहृश ज्ञानस्य ताहृशेच्छाजनकत्वावधारणात् । सुखेच्छायामप्येवमिति चेत् । तर्हि ममापि ऽपाकत्वावच्छे
देन कृतिसाध्यत्वज्ञानादनागते न चिकीर्षेति तज्ज्ञानं सकलपाकविषयकं संनिकृष्टपाकविषयकं वेत्यन्यदेतत्
बालस्य चाद्यस्तन्यग्रहे प्रवृत्तिर्जीवनादृष्टोद्बोधितजन्मान्तरितसंस्कारजन्यात् स्तनपानं कार्यमिति स्मरणात् ।
तचापीष्टसाधनतास्मरणान्तरप्रवृत्तिरनन्यगतिकत्वात् । न च जन्मान्तरेपि पर्यनुयोगः । जन्मधाराया अनादि
त्वात् । प्रत्यक्षानुमानमूलत्वाद्वा । नीधपरेपत्रा । वस्तुतस्तु । क्षुत्कण्ठतया बालो दुःखमनुभवन्विरोधित ४०
या सुखं स्मरति । ततः सुखत्वज्ञानात्सुखप्रवृत्तिकार्यत्वे सुखहेत्वितयांतरंगत्वात् । ननु स्तनपानमिष्टसाधन
मिति स्मरणं । सुखप्रवृत्तित्वेन बहिरंगत्वात् । सुखकार्यत्वे न स्तनपानद्वारा जन्मान्तरानुभूतमिति कार्यत्वस्मर
णोऽस्तनपानमपि विषय । तेन स्तनपाने नोद्दिष्टकार्यत्वज्ञानादेव प्रवृत्तिः । इष्टसाधनताज्ञानस्य तदानीं लाभत्र

शि २

साधनात्। एवं चाद्यप्रवृत्तौ कार्यत्वज्ञानं प्रयोजकं लघुत्वादिति तदुपस्थितदेव प्रवर्त्तकं लघुत्वात्। नवीनास्तु। ममेदं कृतिसाध्य
मिति ज्ञानेन प्रवर्त्तकं। अनागतविषये प्रत्यक्षानुमानयोरसंभवात्। किंतु यादृशस्य पुरुषस्य कृतिसाध्यत्वं यद्दृष्टं ता
दृशत्वमात्मनः प्रतिसंधायन् प्रवर्त्तते। तथाहि ओदनकामस्य तत्साधनताज्ञानवतः तंडुलाद्युपकरणवतश्च पाकः
कृतिसाध्यो अहमपि तादृश इति ज्ञानात्पाके प्रवर्त्तते। एवं चान्यकृतपाके कृतिसाध्यत्वज्ञानमात्मनश्च पाककृति
साध्यत्वप्रयोजनविशेषणवत्त्वज्ञानं प्रवर्त्तकं। अन्यत्रापि प्रवृत्तिरेवमेवेत्यनादिरेव। अतएव संजातबा
धस्यैतत्पर्वंदन्ने विषभक्षणे न प्रवर्त्तते इष्टसाधनताज्ञानवतो हि तत्कृतिसाध्यो। न च संजातबाधस्तत्रेष्टसा
धनताज्ञानवान् एवं तत्त्वीच्छावतोपि भोजने कृतिसाध्यो। तत्रस्य न तत्त्वीच्छावत्त्वमात्मन्यवैतीति न भोजने प्रवर्त्तते
॥ ॥इति नवीनास्तु॥ ॥यादृशस्य सादावविगीतत्वं कृतौ विशेषणमाकुः॥ संजातबाधस्य विषभक्षणीये संवेदनं
विगीतकृतिसाध्यत्वे नैव ज्ञानातीत्यनत्र न प्रवर्त्तते। प्रवृत्तिविषयस्य सामान्यतः कालासंभिन्नः पाकादिर्यते

वि॰मू॰
४१
41

न ४

अदृष्टमहिम्ना वा नागतपाकविषयसिद्धिः। चिकीर्षा च कालासंसिन्नविषया ननु नाविनैकस्या साधयामीत्याकारे॥ ॥
अत्रोच्यते॥ ॥विषयसत्त्वादिव्याप्ते कृतिसाध्यताज्ञाने इष्टसाधनत्वविषयतावच्छेदकं लाघवात्। ननु स्वविशे
षणवत्ताप्रतिसंधानजन्यत्वे गौरवात्। न च सिद्धासिद्धावस्थयोः साध्यसाधनत्वविरोधः। निर्विशेषितयोस्तयोरविरोधा
त्। पाकेऽसिद्धः साध्यः सिद्धः साधनमेवेत्यनुगमात्। तदा साध्यत्वं हि तदा साधनत्वस्य विरोधि नियमस्तेनैव तस्य प्रतिक्षेप
णात्। न च स्वज्ञाननियमात्। ननु साधनत्वस्यान्यदा साधनत्वस्यैव तयोरप्रतिक्षेपात्। अन्यदा साधनत्वेऽपि साधन ४१
त्वमस्त्येव। सामान्यात्ताविशेषात्ताव प्रसंगात्। एवं तदा सिद्धत्वस्य तदा सिद्धत्वं विरोधि नियमात् स्वस्य प्रतिक्षेपात्। ननु सि
द्धत्वमात्रं अन्यदा वितन्न सिद्धत्वात्ताव प्रसंगात्। निर्विशेषितयोर्विरोधे वासिद्धत्वात् सिद्धत्वयोः क्वान्यतरदेव पाकादौ स्या
त्। ननु समयसंदेष्टुस्तर्यां। न च तदा कृतिसाध्यत्वे सति तत्तदेष्टसाधनत्वज्ञाने प्रवर्त्तकं। अत एव वाजपेयेन यजेतेति सू
त्रे यागस्य करणावस्थायां सिद्धत्वे न वाजपेयस्य साध्यता एकदा तयोर्विरोधादिति कर्मनामधेयत्वं। ननु कारणस्य सिद्धत्वे
न साध्यत्वे विरोधः। यागस्वरूपे तयोः सत्त्वात्। अथ विरुद्धयोरवच्छेदभेदमादाय एकत्र प्रतीतिः स्यात्। न च कृतिसा

ध्येष्टसाधनत्वयोः समयस्ते दमादायान्न प्रतीतिरस्ति। तथा लिंगाभावादिति चेन्न। साध्यत्वसाधनत्वयोरविरोधस्योक्त
त्वात्। एवं सिद्धत्वासिद्धत्वयोर्वास्तवस्वरूपत्वेपि न विरोधः। एकधर्मिगतत्वे न मानासिद्धत्वात्। तस्मात्संयोगतदत्यन्ताभावयो
रिवयोः न प्रकारेण ययोर्विरोधस्ते न प्रकारेण तयोरेकधर्मिगत्वं तेन प्रतीयते हि तु साध्ययोर्विरोधेन सामानाधिकरण्याप्र-
तीवे न च व्याप्त्यसिद्धेः। पक्षे साध्यसाधनयोरन्यतरासत्वे वा धासिद्धोरन्यतरोसिद्धेः प्रसंगात्। न च वाच्यमिदानीमन्त्कृ
तिसाध्यत्वमग्रे मदिष्टसाधनत्वं हेतुः दैवाधनधीनत्वे सति यदग्रे मदिष्टसाधनं तदिदानीमन्त्कृतिसाध्यमिति व्या
प्तेः तथा च समयस्ते दमादाय साध्यत्वसाधनत्वयोरवगम इति। इदानीमग्रिमपदार्थयोर्नानात्वादनुगतरूपाभा
वेन व्याप्त्यादेरग्रहात्। पाकन्यायेनान्यत्रापि तत्समयान्तरोवेणैव साध्यत्वसाधनत्वयोरप्रतीतेः। प्रतीतौ वा ममापीदा
नीं कृतिसाध्यत्वे सत्यग्रे इष्टसाधनत्वमिति ज्ञानं प्रवर्त्तकमस्तु। न च पाके साध्येष्टकत्वेन कृतिसाध्यत्वमनुमेयं।
असिद्धावस्थावतो हि पाकादिष्टानुत्पन्नेषु पाकस्यासिद्धत्वमवगम्य तत्साध्यत्वमिष्टस्यावगतव्यमसिद्धत्वे वावगम्य

42

कृतिसाध्यत्वमितिसिद्धत्वासिद्धत्वयोर्विरोधोऽत्रापिद्रष्टव्यः। अपि च स्वविशेषणजन्यकार्यताज्ञानाभावात्सुखे कथं चि
कीर्षा। न हि कृतिसाध्यताज्ञानमात्रात्सा संजातबाधस्य विषत्वज्ञाने दोषि चिकीर्षाप्रसंगात्। अथोपायचिकीर्षायां त
त्कारणं। इच्छाकारणसुखत्वज्ञाने कृतिसाध्यत्वं यदा विषयस्तदा चिकीर्षा नो चेत् इच्छामात्रमिति द्वयमपि चि
कीर्षाहेतुरिति चेन्न। तर्हि इच्छाहेतुज्ञाने यदा कृतिसाध्यत्वं सा स तेन तदा च चिकीर्षा नो चेदिच्छामात्रमित्येवास्तु सुख
तदुपायचिकीर्षाकारणमस्तु। लाघवात्। सुखत्वज्ञानवदिष्टसाधनताज्ञानस्यापि इच्छाकारणत्वात् अतएव पाकेऽस्ये ४२
ष्टसाधनताज्ञाने कृतिसाध्यत्वं विषय इति तत्र चिकीर्षा न तु वृष्ट्यादिज्ञाने तद्विषयत्वमितीच्छामात्रं। सुखचिकीर्षाया
मिच्छाकारणज्ञाने कृतिसाध्यताविषयके चिकीर्षाजनकत्वावधारणात्। अन्यथा तत्र चिकीर्षानुत्पत्तेः। वस्तुतस्तु
-दुपायचिकीर्षा इष्टसाधनताज्ञानसाध्या उपायेच्छात्वात्। वृष्टीच्छावत्। न च भोगचिकीर्षाविरहेण विनास्यादिस

प्रयोजकत्वे। उपायेच्छायास्तदनुव्यतिरेकानुविधानात्। इष्टेः स्वतोऽसुदरत्वेनेच्छानुत्पत्तेः। अनुगतोपायेच्छायामनुगतस्य
प्रयोजकत्वे संभवति बाधकं विना सागायोगाभावेन व किंकीर्घान्यत्वे सति उपायेच्छात्वमिच्छात्वं वा तत्रान्यत्वे प्रयो
जकं गौरवात्। सुखेच्छायां तदन्ताभावात्। एवं चोपायविकीर्षाया मिष्टत्वज्ञानेऽक्षमवेति प्रयोगवारणार्थं कृतिसाध्यत्वप्र
कारनिर्वाहार्थं च पतिसाध्यत्वमपि विषयतयावच्छेदकमस्त्। ननु तद्विहाय तन्मात्रं। कुसुमकारणीं विना कार्यानुत्प
त्तेः। अतएव स्नानपानप्रवृत्तावपि उपायेच्छाकारणत्वेन गृहीतस्येष्टसाधनत्वज्ञानस्यापि कल्प्यं। इष्टानुरोधित्वात्।
ननु साधनत्वमिच्छाविरोधितस्य सिद्धधर्मत्वात्। कृष्यादौ तत्साध्येष्टज्ञानादिति चेत्। न निर्विशेषितयोः सिद्धत्वासि
द्धत्वयोरविरोधेनेच्छासाधनत्वयोरविरोधात्। तदाऽसिद्धत्वं न चेच्छासाधनत्वयोः प्रजकमिति तथा न ज्ञायत एव।
वस्तुतत्साध्येष्टज्ञानात् कृष्यादावि च्छेति । ननु छं। असिद्धावस्था कृष्यादेरिच्छानुत्पत्तेस्तस्यावश्यं सिद्धत्वमवगत
व्यं इच्छानुरोधित्वाद्यासिद्धत्वमिति तत्रापि विरोध एव दृष्टो ससामिष्टं तया विनानेसन्वया। व्यतिरेकग्रहद्वाविरोध

तद्वासिद्धत्वं ३

53

चिं०श०मू०

४३ सिद्धत्वमादाय वृष्टिनिरूपितेष्टसाधनत्वग्राहकत्वात्। किं च चिकीर्षाजनककृतिसाध्यं मंडलीकरणमिति स्वार्थप्रतिपा
दकं मंडलीकुर्यादिति वाक्यं। प्रमाणीस्यात्। विषयाबाधात्। एतेन नवीनमतमपास्तं। परस्य हि कृतिसाध्यत्वोदन
कामनावत्त्वेष्टसाधनत्वज्ञानाज्ञानौ। तथा च नोदनकामनावत्त्वेष्टसाधनताज्ञानस्य ज्ञानेन प्रवृत्तिकार
णे। गौरवात्। किं तु मत्कृतिसाध्यत्वे सति मदिष्टसाधनताज्ञानमेव लाघवात्। यथा च साध्यत्वसाधनत्वयोः
न विरोधः। नागतस्य पाकादेः कृतिसाध्यताज्ञानेऽपि तत्पाकोपकादितमेव। किं च परकृतिसाध्यत्वमज्ञात्वापि स्वकृ ४३
तिसाध्यत्वेष्टसाधनताज्ञानात्स्वकल्पितलिप्यादौ योऽयमनेकामोदका तत्संयोगादौ प्रवृत्तेश्च। तदेव प्रवर्तकं। व
स्तुतस्तु। सिद्धविषयककृतिसाध्यत्वाज्ञानात् कथं पाकं कुर्यामसाधयामिति इच्छा। सिद्धे इच्छाविरहात्। असिद्धस्या
ज्ञानात्। अथ सिद्धविषयादेव कृतिसाध्यताज्ञानात् असिद्धिविषया कृतिसाध्यत्वेनेच्छा जायते। इच्छायाः असिद्ध
विषयस्वभावात्। एकप्रकारकत्वेन ज्ञानचिकीर्षयोः कार्यकारणभावो न त्वेकविषयत्वे सति गौरवात्। इच्छा

याऽनागतविषयत्वात्तस्य चाज्ञानात्तथात्वात्। अदर्शनात्सुखादीच्छायामप्येवमिति चेत्। न। असिद्धविषयेच्छानुरो
धे नागतज्ञानोपायस्य दर्शितत्वात्। अस्त्वेवं तथापि कृतिसाध्यताज्ञाने इष्टसाधनत्वमेव व्यावर्तकमस्तु। स्व
परकीयेष्टसाधनताज्ञानफलकामनाज्ञानात्तु। तदपेक्षया लघुत्वात्। इष्टसाधनताज्ञाने ज्ञानस्य फलकामना
ज्ञानस्य च हेतुत्वे मानाभावाच्च। नव्यास्तु स्वकृतिसाध्यताज्ञानमेव वर्तकं तेन स्वकृत्यसाध्ये इष्टत्वादौ का
रीर्यादिकृषीबलस्य न प्रवृत्तिः। न च संजातबाधस्य विषत्तस्य पो।दादिच्छास्ति इष्टसाधनत्वेनाज्ञानात्तत्प्रवृ
त्तिप्रसंगः। स्वकृतिसाध्यत्वज्ञानविषये इष्टत्वस्य स्वरूपसतः प्रवृत्तौ सहकारित्वात्। न च संजातबाधस्य विषत्त
स्य पादाविच्छास्ति। इष्टसाधनत्वेनाज्ञानात्। अतीतस्योऽजनेप्यत एव न प्रवर्तते। तत्तैः सिद्धतयेच्छाविरहेणास्योऽजने
तदुपाधिकेष्टत्वाभावात्। अतीतत्वस्याविच्छानास्तीति तत्साधनेपीष्टत्वाभावादेव न प्रवृत्तिः। न चैवं पाके न प्रवर्ते
त। तस्य स्वत इष्टत्वाभावादिति वाच्यं। इष्टसाधनत्वज्ञानेन तस्यापीष्टत्वात्। हि तेव प्राथमिकत्वादिष्टार्थमव

45

घटादेरेषणीयत्वात्। कृतिसाध्यत्वे सतीष्टसाधनताज्ञानमेव चिकीर्षाकारणमस्त्विति चेत्। न। इष्टसाधनताज्ञा
नेपि भोगे चिकीर्षासत्त्वात्। तस्मात्स्वकृतिसाध्यत्वज्ञाने सति इष्टत्वमेव कारणं। न त्विष्टसाधनत्वं व्यभिचारात्। पाका
दौ तदन्वयव्यतिरेकावपीष्टत्वेनोपक्षीणौ। एवं भोगेपि प्रवर्त्तेतेति चेत्। न। इष्टसाधनतापक्षेपि मुक्तिरूपेष्ट
साधने सुखे प्रवर्त्तेतेति तुल्यं। सुखे चिकीर्षास्त्विव सेवकृतिस्तन्न भवति। कृतेस्तसिद्धस्य सिद्धार्थविषयत्वानि
यमादिति चेत्। तुल्यमिति। तस्मात्कृतिसाध्यत्वविशिष्टत्वं सहकारीति। मैवं। इष्टसाधनताज्ञानस्योपायेच्छां ४४
प्रति हेतुत्वावधारणात्तस्यास्तज्जन्यत्वनियमात् इच्छायाः स्वविषयेच्छाजन्यत्वादकत्वनियमात्। ननु सिद्धौदने कृ
तो न पाके प्रवर्त्तते। ओदनमात्रस्य सिद्धत्वेनेष्टत्वाभावात्। अत एवातीतत्वोदनादौ न प्रवर्त्तते। अतीतस्यादावि
च्छाविरहात्। ननु सामुद्रकविदाख्यातोत्तावियोगस्य साधने स्वकृतिसाध्यत्वे सतीष्टसाधनत्वज्ञानात् कु
तो न प्रवर्त्तते। नाविराज्यस्यासिद्ध्यत्तेः। सिद्धविषयत्वानियमात्। अन्योपायापरिज्ञानात्। तत्परिचये प्रवर्त्तत एव

वादेवताराधनादावितिचेन्न। सिद्धेश्चिकीर्षाविरहेण यागादावप्रवृत्तिप्रसंगात्। देवताराधनादेरप्यसिद्धत्वे
नतत्राप्रवृत्तिप्रसंगाच्च। किंच राज्योपायापरिचये तत्रमाप्रवर्त्तिष्ट। स्वकृतिसाध्येष्टसाधनत्वेन ज्ञाते राज्ये प्र
वृत्तिप्रसंगे किमायातं। नहि कृतिसाध्येष्टसाधनत्वेन ज्ञातेपि तदुपायज्ञानं तत्र प्रवर्त्तकं गौरवात्। किन्तु वि
षयत्वाद्येति चेत्थमेवं। यो वनेहितावत्प्रवर्त्तत एव राज्ये। वीत्येतु राज्योपायमकृत्वा मत्कृते सेदानीं राज्यं न
सिध्यतीति स्वकृत्यसाधनताज्ञानादेव न प्रवर्त्तते। यथा तंडुलैर्विना पाके। स्वकृत्यसाध्यताज्ञानात् राज्योपा
ये तु स्वकृतिसाध्येष्टसाधनत्वेन ज्ञाते देवताराधनादौ प्रवर्त्तत एव। अत एव व्रीह्यवघातमकृत्वा पुरोडाशोस्त्वमकृ
त्वा यागस्तमकृत्वाऽपूर्वं साधयितुं न शक्यत इति क्रमेणावघातादौ प्रवर्त्तते न तु युगपत्। असिद्धत्वात्सासि
द्धक्रियाविषयस्यैवाप्रवृत्तेः। यागानन्तरं च नापूर्वे प्रवर्त्तते। कृत्यन्तरं विनैव यागकृतितस्तत्संभवात्॥
इष्टसाधने चेष्टोत्पत्तिनान्तरीयकदुःखाधिकदुःखाजनकत्वं विशेषणं। ननु तत्र तज्ज्ञानाभावः कार

चिं० शा०

४५ णौ। किंतु तदेव विषयतया कारणतावच्छेदकं लाघवात्। तेन मधुविषसंपृक्तान्नभोजनेन प्रवृत्तिः। परेणापि प्रवृ
45 त्ति पूर्वं लिंगविशेषणत्वेनादिन्यथा वा तत्तज्ज्ञानविनियोगस्वीकारात्। एवं बाल्पायाससाध्यादिष्टोत्पत्तिसं
त्त्वेन बह्वायाससाध्ये प्रवृत्तिः। अत एव अक्षतस्वर्गफलत्वेपि विहितबहुवित्तव्ययायाससाध्ये ज्योतिष्टो
मादौ फलत्वमाकल्प्यते। अन्यथाऽल्पायाससाध्यादेव स्वर्गसिद्धिसंभवे तत्राप्रवृत्त्यावननुष्ठानलक्षणम
प्रामाण्यं तद्विधेः स्यात्। बलवदनिष्टाननुबंधित्वे। वननविशेषणे बहुवित्तव्ययायाससाध्ये बहुतरदुःख
स्यापि अबलत्वं क्वचिदल्पदुःखस्यापि बलवत्त्वमित्यननुगतस्याप्रवाहात्। न चेष्टापेक्षयाधिकस्याधिकत्वे बल ४५
वत्त्वं। तस्याप्युक्तस्याननुगमात्। आस्तिकस्यानैनिषिद्धत्वेन ज्ञातेपि प्रवृत्तिरागद्वेषयोरुत्कटत्वेन नरकसाध
नत्वज्ञानाविरोधनात्। ननु नकलंजं भक्षयेदित्यत्र विध्यर्थनिषेधानुपपत्तिः। तन्मते तत्स्य तन्निरूपेष्ट
साधनत्वात्। न चासुराविद्यादिवत्पर्युदासलक्षणयाविरोध्यनिष्टसाधनत्वबोधनं। न यज्ञो समस्तत्वात्

क्रियासंगत्वतत्वेन प्रतिषेधवाचकत्वव्युत्पन्नेश्चेति चेत्। विशेष्यवति विशिष्टनिषेधस्य सति विशेष्ये बाधे विशेषणे इति न्यायेन विशेष
णनिषेधे पर्यवसायितया कलंजभक्षणमिष्टोत्पत्तिनांतरीयकदुःखातिरिक्तदुःखसाधनमिति न कलंजं भक्ष
येदित्यनेन बोधनात्। इष्टसाधनतावाचकस्य विधेः सामान्यनिषेधानुपपत्तेः। बलवदनिष्टाननुबंधी
-ष्टसाधनत्वविशेषणनिषेधतात्पर्यं। न च यथा वाशक्यविशेषणनिषेधपरत्वं नञ इति किंचित्। तन्न। यथा हि योग्य
तया छिद्रं विहाय घटेन तादितरान्वयो न तु छिद्रेतरत्वेन युगपद्वृत्तिद्वयविरोधात्। तथात्रापि बलवदनि
ष्टाननुबंधित्वेन नोपस्थितिरिति कथं तन्निषेधः। श्येनेनाभिचरन्यजेतेत्यत्र कथं विधिप्रवृत्तिः हिंसायां
बलवदनिष्टसाधनत्वादिति चेत्। तत्र कृतिसाध्यत्वे सतीष्टसाधनत्वमेव योग्यतयान्वेति न तु बलव
दनिष्टाननुबंधित्वमपि। अयोग्यत्वात्। निंदार्थवादेन प्रायश्चित्तोपदेशेन च हिंसाया बलवदनिष्टसा
धनत्वावगमात्। अत एवाहुर्विहितश्येनविगानान्न तात्त्विकप्रवृत्तिः। रागद्वेषयोरुत्कटत्वेनानिष्टानुबंधा

46

शास्यतिरस्कारात्कस्यचित्प्रवृत्तिरित्येके। अन्ये तु। अतिचारस्य वैरिवधफलत्वेनाकृतत्वाद्वधसाधनत्वेन
श्येनो नाविधीयते। ननु वधसाध्यानरकसाधनत्वेन नरकस्य फलेनाकृतेः। न वञ्जनकजनकस्य जनकत्व
नियमः। कुंतकारस्यापि तत्परंपरायाः कुंतजनकत्वापत्तेः। विधिनैव श्येनस्य बलवदनिष्टाननुबंधित्वबो
धनाच्च। न च श्येनस्य नरकाहेतुत्वे अपेक्षितवैरिवधहेतुत्वेन चाविगानेन प्रवृत्तिः स्यादिति वाच्यं। श्येना
द्वधो वधाच्चावश्यं नरक इति प्रतिबंधाने नविगानात्। ननु श्येनो नाम मरणफलकव्यापारत्वेन हिंसा सा च नर
कजनिकेति चेन्न। न हि सा तत्परे परासाधारणमरणफलकव्यापारो हिंसा कूपादौ विनष्टे गवि तत्कर्तुर्गो ४६
वधकत्वापत्तेः वध्यस्यापि हेतुमन्यूत्पादद्वारेण तन्महत्त्वप्रसंगाच्च। न हि अनुत्पादितकश्चित्कमपि व्या
पादयति किं त्वनुनिःष्पादितमरणफलको व्यापारो हिंसा। यदनंतरं मरणं तत्र सैव। न च श्येनस्तथा किंतु ख

क्रूहननादिकमेव। अथ मरणानुकूलो मरणोद्देशेनानुष्ठीयमानो व्यापारो हिंसा। श्येनस्तथा। कूपादौ न मर
णोद्देशेनानुष्ठीयमानत्वमिति चेन्न। एवं सति गौरवात्। अन्यमरणोद्देशो नास्ति स्वनाशाय वध्ये ब्राह्मणोवृ
हिंसा न स्यात्। किं च हिनस्ति धात्वर्थविच्छेदकं फलमव्यवहितमेव मरणं। अव्यवहितफलकव्यापारस्यैव सर्व
त्र धात्वर्थत्वात्। अन्यथा परंपरया विक्लित्तिफलकात्तन्नकाष्ठतण्डुलक्रियादावपि पचतीति प्रसंगात्। एवं घ
ञ्जव्यापारानंतरं यत्र विलंबेन मरणं प्राणपाकपरंपरया वा। अन्ने विषप्रयोगेण वा तत्र हन्तृत्वं प्रायश्चित्तादि
च ततो न स्यादिति चेन्न। प्रायश्चित्ततुल्यतार्थं हि तत्र हन्तृव्यपदेशो गौणः। विभिन्नगमकं लाघवमेव। वस्तु
तस्तु मरणोद्देशेन कृतो दृष्टद्वारकस्तदनुकूलो व्यापारो हिंसा। श्येनस्तथा। दृष्टद्वारा मरणसाधनमतो न हिंसा
यद्वा दृष्टद्वारादिमरणसाधनं हिंस्यात्। तदा समभीते लाऽस्या दृष्टद्वारेऽन्यायविनाशहेतुत्वात्। अव्यव
न कर्तुर्हिंसकत्वापत्तेः। अतएव कूपादौ गोमरणेऽपि गोवधकर्तृत्वं न तत्कर्तुर्गलिलग्नान्नमरणे नन्तो कुर्न्नीत्म

हंतृत्वं। न वारिवेषयितुब्रह्महंतृत्वं। अन्नपाकपरीपर्याविलंबे नाविषप्रयोगेन एव हंतृत्वं। मुख्यमेवान त्वं निः
पादितमरणफलकत्वेग लेलग्नान्नमरतो हंतृत्वापत्तेः। अन्योद्देशेन नष्टिसनारायेन हतेषु आलतेषु ब्रह्महंतृ
त्वं न स्यादिति चेत्। नाइष्टापत्तेः। व्यपदेशस्तु गौरणप्रयोगो लक्षणया वापि समर्थयितुं शक्यते। त्यत्यक्त्वेपं ऽतिप्र
संगो न वारयितुं शक्यत इतीदमेव विनिगमकं। अत एवातदुद्देशेन कृतेपि निषेधे प्रायश्चित्ताद्यनुक्तौ। अपरे
त्वनतिसंहितनरांतरव्यापारमद्वारीकृत्य मरणव्यासारं धनं हिंसा। खड्गकारस्यानतिसंहितनरांतरव्यापारद्वारा
मरणसाधनत्वं। तस्य हि सांतरव्यापारो नातिसंहितः किंतु धनेलात्त इति खड्गकारो न घातकः। विषस्य अन्ने प्र
क्षेपेण नरांतरे भोजनमेवातिसंहितं। अनेनेदं त्वोक्तव्यभिचारः विषप्रयोगादिति हिंसैव विषप्रयोग
इति तन्मागलल ग्नान्नकवलात् यत्र मरणेन नपरिवेशयितु घातित्वापातात्। अनेनेदं तोक्तव्यभिचारः संधाय
परिवेशणात् त्वो कुरात्महंतृत्वापत्तेश्च अनतिसंहितनरांतरव्यापारमद्वारीकृत्य मरणानुकूला न्नस्य ४७

पिकाम्यत्वे ॥ अत एवाव्यवहितप्राणवियोगफलको व्यापारो हिंसा अग्रपाकर्परे परयामृते हेतुत्वे व्यापारस्याव्यवधाय
स्यवहेतुत्वेनेरस्तो। स्यादेतत्तावत्। इष्टसाधनता विधिः। नित्यसंध्योपासनादौ फलाभावात्। अथ नास्त्येव तान्निस्ती।
साधारणादेकं विधिवाक्ये वा न फलं श्रूयते मास्ति संध्यामुपासते ये तु सततं शितव्रताः। विधूतपापास्ते यान्ति ब्रह्म
त्वमक्षितानना मितिअर्थवादात् दद्यादहरहः श्राद्धं पितृभ्यः प्रीतिमावहन्ति त्यादि विधिश्रवणाच्च। कृत्वा विन्ने तु
... या तस्वर्गः फलमिति वेत्। न। कामनोपाधिकार्यत्वे यागवन्नित्यतासंग
त्वसाधनात्तेति वेद ... तत्साधनत्वे ... मात्र कृतिसाध्यं संध्यावंदनमवगतं। कामनोपाधिकार्यत्वे वयदा फ
नासंध्योपासनास्तावस्तादकरणो वाप्र... ना न स्यात्। न हितं कालफलकामनावश्यं तावः। प्रमाणाभावात्। किंत
ते॥ विधेरिष्टसाधनत्वबोधकत्वात्पारिशेषिमात्रस्याधिकारोऽवगतस्तथा वतन्नापेक्षवरमप्रवृत्तार्थवादोप
लं कल्पयती। काम्यत्वस्य त्वयापि स्वीकाराहरहः श्रुतिविरोधात्। नित्ये फलश्रुतेरर्थवादस्य वस्तुतो तात्पर्यं।। अ
स्यन्यो न्याश्रयश्च प्रावन्नित्य नैमित्तिक

48

47 हेतुत्वं। न वा रिवेषयितु ब्रह्महेतुत्वं। अणपपात्मकार्यत्वेनित्यतास्यतेः। किं वा नित्येतत्कर्तव्यताबोधनात्। प्राकू
पादितमरणफलकत्वेन गललग्नान्नमरणेव गम्य कर्तव्याकरणे प्रत्यवायकल्पनं। विधिश्च फलान्तावेन प्रथम
त्वं न स्यादिति चेत्। नानिष्टापत्तेः। व्यपदेशस्य तु त्वौ कर्तव्याकरणे प्रत्यवायकल्पननित्यत्वेनोन्याश्रयश्च। अपरे तु
संगो न वा रयिशक्यत इति। इदमेव विकिरणे प्रत्यवायकल्पनं येनान्योन्याश्रयः। किंतु निंदार्थवादेन प्राय
श्चितसंदिहितनरोसनस्यारमद्वारीकृतताव्यापाररूपस्याभावः। प्रत्यवायहेतुत्वगतः। तथा च संध्योपास
मरणस्य प्रत्यवायद्वारा दुःखसाधनेऽदुःखसाधनात्वात्त्वेन फलं प्रायश्चित्ते पापध्वंसवदिति। तत्साधनत्वे ४८
स्रेपेतं। बोध्यते विधिना। नवैवं प्रत्यवायपरिहार एव फलमस्त्विति वाच्यं। परीहारस्य प्रागभावरूपत्वे
- इति तन्नि। प्रासाध्यत्वात्। न चोपासनाकरणे प्रत्यवायहेतुर्नोपासनाभावः। तथा च दुःखसाधनात्वात्त्वे न फ
परिवेश्ययनुपासनमिति वाच्यं। निंदार्थवादस्योक्तयत्नमत्वेनोत्तयस्यापि तथात्वादिति। तन्न। एवम

पिकाम्यत्वे नित्यतादशतिप्रसंगात्। किं च कुर्वन्विहितं कर्मेत्यादिना नोपात्ते यथा पथ्यमामित्यादिनायकरणात्ताव
त्यवहेतुत्वं बोध्यते। ननु तद्विषयतावस्या अन्यथाकर्तुः प्रत्यवायो नान्यस्येति कथं स्यात्। विषयतावस्य
साधारणत्वात् व स्फुतस्का। कृतिसाध्यत्वे सतीष्टसाधनताज्ञानं प्रवर्त्तकत्वेन निर्व्यूढं। न च कृतौ कृतिसाध्य
त्वमस्ति। अतो न किंचिदेतत्। न चैनास्ति नित्यापूर्वं प्रागभावो दुरितद्वारा दुःखसाधनं। तदभावोऽपूर्वं दुः
खसाधनाभावत्वेनेष्टं। तत्साधनत्वेन कृतिसाधनत्वेन च संध्योपासनं विधीयत इति तन्न। नित्यार्थवादि
नासंध्योपासनाभावस्तदकरणं वा प्रत्यवायहेतुरवगतः न त्वपूर्वाभावः। प्रथमं प्रमाणाभावेन तदनुपपत्ति
तेः। विधेरिष्टसाधनत्वबोधकत्वान्न परिशेषेणापूर्वमिष्टं कल्प्यत इति चेत्। तर्हि विश्वजिन्यायात्स्वर्ग एव फ
लं कल्प्यतां। काम्यत्वस्य त्वयापि स्वीकारात्। किं च विधिप्रवृत्तावपूर्वज्ञानं अपूर्वज्ञाने च विधिप्रवृत्तिरि
त्यन्योन्याश्रयश्च। यावन्निस नैमित्तिकनिर्वाहस्य तत्तदाश्रमविहितकर्मणां सम्यक्परिपालनस्य ब्रह्म

लोकाचाम्निःफलैश्रूयते। तथाचनित्यस्यसफलत्वमितिकेचित्। तन्न। तस्यविधेर्निस्सविधित्वमुपजीव्यप्रवृत्तेः। तस्यच
पलात्वेनप्रथमंमूकत्वात्। अन्यथापरस्परसापेक्षत्वेऽन्योन्याश्रयात्। तस्मात्कार्यतैवविधिः। ननुनित्येवेदात्का
र्यताज्ञानेपिप्रयोजनज्ञानंविनाकथंप्रवृत्तिः। ननुप्रयोजनमनुद्दिश्यमंदोपिप्रवर्त्ततइतिचेत्। न। नित्यफलबोधे
प्रवृत्तिमात्रेप्रयोजनज्ञानस्याप्रयोजकत्वात्। काम्येपिप्रयोजनज्ञानंनसाक्षात्प्रवर्त्तकं। उपायविषयत्वात्। प्र
योजनेऽप्रवृत्तेश्च। किंत्विष्टसाधनताज्ञानद्वाराकार्यताज्ञानोपक्षीणमेव। कथमयंनिर्णयः। नित्येष्टसाधनताज्ञा
नासंभवात्। कार्यताज्ञानस्यवेदा॥ दपिसंभवात्। ननुनिःफलेदुःखैकफलेवाकथंप्रज्ञावतांप्रवृत्तिः। वेदाधीन ४९
कार्यताज्ञानसत्वात्। सफलेप्रवृत्तावपितस्यैवतंत्रत्वात्। ननुलौकिकेदुःखैकफलकेनप्रवर्त्तते। तदिष्टसाध
नतालिंगस्यकार्यताज्ञानस्यवेदाधीनस्याभावात्। नचदुःखैकफलत्वज्ञानंप्रतिबंधकं॥ सतिकार्यताज्ञा
नेतस्यप्रतिबंधकत्वादर्शनात्। अथवाकाम्येलिंगोऽपूर्ववाचकत्वान्नित्येपिलिंगोपासनादिविषयकमपूर्वंबो
ध्यते। तच्चनिःफलमपिस्यतएवप्रयोजनंनित्यस्यधर्मज्ञानंवेति। उच्यते सर्वत्रनित्येफलश्रवणात्। जीवीफ

लकामस्यसंबलिताधिकारः। यथोपरागादिनैमित्तिकं स्नानश्राद्धादिफलश्रुतेः। काम्ये। अकरणे प्रायश्चित्तास्म
रणाद्दिश्रुतेश्च नियतकर्त्तव्यताकं। यथा वा शोघोडशश्राद्धे प्रेतत्वविमुक्तिकामनाश्रुतेः प्रेतत्वविमुक्तिहेतुषोडश
श्राद्धसंकल्पं विधायमासाज नानामावास्याकाम्यत्वं निंदार्थवादेनाकरणे नप्रसवायश्चेरवश्यं कर्त्तव्य
त्वं तथा संध्योपासनमपि फलश्रुतेः काम्यकरणे न नरकश्रुतेः प्रायश्चित्तोपदेशाद्वा नियतकर्त्तव्यताकं। य
त्तु यागे काम्यत्वेपि न नियतकर्त्तव्यताकत्वं तदकरणे प्रायश्चित्तानुपदेशात्। न चाग्नित्वं फले कामनायाः असंत-
वः। अग्निकालकाम्यस्तवपाठवाग्नित्वं फले कामनासंत्त्वात्। यच्चु प्रथमप्रवृत्त्याऽहरहःश्रुत्या तत्कालजीविमात्रस्या-
धिकारबोधनान्न फलकामस्याधिकार इति। तन्न। अहरहःश्रुत्या अर्थवादयोः प्रथममगृहीतैकवाक्यत-
यां बले न तत्कालजीविफलकामस्यसंवलिताधिकारात्। अर्थवादोपस्थितफलान्वयैर्विना एकवाक्यतासंगा
ता न चार्थवादस्य स्तुतिपरत्वान्नैकवाक्यता। बाधकं विना स्वार्थापरित्यागात्। विधिवाक्योपस्थितेः फले विधिफ

लमादायैवाहरहः श्रुसाकार्यताबोधनात्। नन्वेवं तत्कलञ्जीविकामिनोऽधिकारे यदा फलकामनाविरहः तदाऽश्र
श्रुते रिवाधिकाराश्रावात् नित्यकर्त्तव्यता न स्यात्। अधिकृताकरणे हि प्रत्यवायो न त्वकरणमात्र इति चेत् न।
नैमित्तिकस्य तत्काले कस्यचित्कामनाविरहेणानियतकर्त्तव्यतापत्तेः। अथापवादाभावे नोत्सर्गिकी फलका
मनास्त्येव फलज्ञानस्य स्वविषयेच्छाजनकत्वस्वाभाव्यात्। यस्य मुमुक्षापवादे न फलांतरे कामनानास्ति
तस्याकरणेऽपि न प्रत्यवाय इति न तन्नियतकर्त्तव्यताकं नैमित्तिकं। तथा नित्येऽपि मुमुक्षया फलकामनाबा
धे नाऽकरणेऽपि न प्रत्यवाय इति तुल्यं। किंवार्थवादोपस्थितफलोपाधिकर्त्तव्यत्वेऽवगतेऽकुर्वन्विहितकर्मेत्या
दिवाक्यात् शौचे सति संध्यावंदनाकरणे निंदार्थवादेन नरकश्रुतेः। प्रायश्चित्तोपदेशाच्च प्रत्यवायकल्पने
तत्फलकामनाविरहेऽपि प्रत्यवायपरीहारार्थी नियमतः प्रवर्त्तते विधिप्रवृत्त्यनेतरं प्रत्यवायस्य प्रामाणिकत्वा
अकरणेऽनुरवस्यकरणे न प्रत्यवायप्रागभावस्य साध्यत्वात्। नैमित्तिके फलोपाधिकर्त्तव्यत्वे कामनाविरहे

पिनियतकर्त्तव्यतावत्। यत्तु निःफलेपिनित्येवेदाधीनकार्यताज्ञानात् प्रवर्त्तत इतितन्न। दुःखैकफलत्वेनज्ञा
यमानेप्रेक्षावतांप्रवृत्तेरनुत्पादनियमात्। अयोग्यतयानित्येष्टसाध्यत्वस्यबोधयितुमशक्यत्वात्। अतएव
संध्योपासनमफलमपिक्रियतेवेदबोधितकर्त्तव्यताकत्वादितिप्राभाकरगुरुमतमेतत्। नगुरोर्मतमित्यस्याभिधा
योपेक्षितवानाचार्यः। यद्यपिअपूर्वस्यैतएवप्रयोजनंभिन्नफलं। तदपिन। एवंकाम्यत्वेनित्यताहान्यापत्तेः॥
किंवसुखंदुःखाभावश्चमुख्यंप्रयोजनं तत्साधनंचगौणं नित्यापूर्वंच तेषुनैकमपिपंउत्वात्। काम्यापूर्वं
वसुखहेतुर्गौणं प्रयोजनं। प्रवर्त्तकविध्यर्थानुरोधेनतदपिप्रवर्त्तकं कल्प्यतइतिचेत्। न। प्रवर्त्तनीयेनलोकेनतु
स्यप्रयोजनत्वेनाज्ञानात्। गुरूणांनित्यापूर्वंप्रयोजनमुक्तंरसुच्यमानेपिनादरःप्रेक्षावतां। मुक्तिःस्वर्गोवालौ
किकावपिसुखदुःखाभावजातीयतयाप्रयोजने। तस्मादेवंवदन्गुरुरपिलघुरेव। तदयंसंक्षेपः। नित्ये। दुःखै

51

कफलत्वेनप्रवृत्त्यनुपपत्तेः।तथाचार्थवादिकंविधिवाक्यश्रुतंवाश्रुतंवाफलमस्तु।किमनेन।नचकामनाविरहे
नियतकर्त्तव्यतानस्यात्।अपूर्वादीच्छाविरहेपितुल्यत्वात्।प्रत्यवायपरीहारार्थंनियमतःप्रवृत्तिस्तुल्यैव।यत्र
चनफलश्रुतिःतत्रविश्वजिन्न्यायइति।नन्विदमिष्टसाधनमितिज्ञानादेतत्साध्यमिष्टमितिज्ञानाच्चप्रवृत्ति
दर्शनात्प्रथमस्यैवप्रवर्त्तकत्वेकिंविनिगमकं॥ ॥उच्यते॥ ॥फलेच्छायांस्वविषयविशेष्यकज्ञानस्यहेतुत्वेनत्वे
नकृत्वात्उपायचिकीर्षापिबाधकंविनातथा।वस्तुतस्तु।कृतिसाध्ययागस्यसाध्यइष्टइतिज्ञानस्यैवप्रव ५१
र्त्तकत्वेयजेतेतिपदात्प्रथमंकृतिसाध्योयागइतिज्ञानंततःकृतिसाध्ययागस्यसाध्यइष्टइतिज्ञानेविशेष
णीज्ञानसाध्यत्वाद्विशिष्टज्ञानस्येतिज्ञानद्वयीतत्रममयागःकृतिसाध्यःइष्टसाधनमित्येकमेवज्ञानंनच
कृतिसाध्यत्वेयागेबोधयित्वाकृतिसाध्ययागस्यसाध्यइष्टइतिलिं।अबोधयितुंशक्यमपि।एकस्यार्थान्व

यमपि स्वपदार्थबोधयित्वा तदन्वितापरस्वार्थान्वयबोधकत्वस्य पदान्युत्पत्तेः। यत्र पदे च तत्साम्प्रयोगान्वयं बोधयित्वा
पर्यवसिते पुनः स्वार्थान्वयबोधकत्वे आवृत्तिप्रसंगात्। अथ साध्यमिष्टं यस्येति साध्येष्टकत्वे शक्ती। तथापि वकुञ्जी
हि अर्थापत्त्या इष्टस्य साधनमिति पश्यर्थस्य लक्षणामुक्त्वादेव शक्ती। किंच। तत्साध्यत्वं न नियमतः स्तदुत्तरक्षणस
त्वे दुःखसाध्यघटे व्यभिचारात्। नापि तदवच्छिन्नतत्क्षणोत्तरक्षणसत्त्वे एवकारव्यवच्छेद्यतदनुत्तरसमयस्य
आकाशेऽप्रसिद्धेः। शब्दस्य तत्साध्यत्वापत्तेः। अत एव न तदुत्तावव्यापकात्तावसत्त्वे प्रतियोगित्वं। रूपेऽससाध्यकत्वा
पत्तेः। नापि तदवधिकोत्तरत्वव्याप्यसमयसंबंधः। तदुत्तरत्वव्याप्यत्वे हि कुत्र तरत्वानधिकरणकालाप्रसिद्धेः। तथा
काशेऽप्रसिद्धं। गुरुतरं च। तस्मात् साधनकत्वमेव। तत्साध्यत्वं। एवं च लाघवात् साधनत्वज्ञानमेव प्रवर्तकं। ननु त
त्साधनत्वकत्वज्ञानमिति। स्यादेतत्। इष्टत्वज्ञानस्य प्रवर्तकत्वं तत्र दोषोपि स्तोजने प्रवर्तेता मनस्तात्वं तु द्विष्टत्वज्ञानात्। अ रि
थस्वरूपसत्त्वपि फलेच्छाकारणीभावसिद्धतयाकारणीभावसिद्धतयात् दोषो नास्तीति चेत्। हंतैवमावश्यकत्वात्फले

च्छैवकारणं। ननु न ज्ञानं गौरवात्। किं च इच्छाज्ञानस्य कारणत्वे इच्छाकारणं ज्ञैनस्यात्। स्वज्ञानेनैतन्नाशात्। इच्छा
तज्ज्ञानधाराकल्पनेनानवस्थानात्। अपि चेच्छाविषयः सुखमिति ज्ञानं न मानसं। सुखस्यासिद्धतया तद्विशे
ष्यकसाक्षात्कारस्य तत्सन्निकर्षं विनासंभवात्। ओदनादावपीष्टत्वज्ञानेन संभवति मनसो बहिरस्वातंत्र्यात्
नापि चक्षुरादिना ज्ञानतः कृतमिति वदिष्टमिति ज्ञाने तत्राविशेष्यासन्निकर्षात्। वस्तुतस्तु इष्टस्य विशिष्य सुख- ५२
त्वादिना ज्ञाने यागपाकादाविष्टसाधनताज्ञानेऽव्याप्तिप्रसंगः। इष्टस्याल्पाधिकसाधनेन नानाप्रकारकत्वे
न च विशिष्यानध्यवसायात्। न चेच्छाविषयत्वावच्छेदकसुखत्वादिरूपलक्षणमिष्टत्वं सुखदुःखाभावतत्सा-
धनेष्वनुगतस्योपलक्षणस्याभावेनाननुगमादिति। उच्यते। यत्रेच्छा तत्साधनताज्ञानमेव लोकवेदसाधा-
रणी प्रवर्त्तिका। नेष्टसुखदुःखाभावतत्साधनत्वेनेच्छाविषयाणां नाम ननुगतानामपि। वस्तुतस्तु इच्छाविषयत्व

मेवानुगमकं। एवं यदि सुखादाविच्छा तत्र तिस्वकृतिसाध्यत्वे सति सुखादिसाधनमिति ज्ञानं तदा पाकादौ प्रव
र्त्तेत। नन्वेवं प्रवर्त्तकज्ञानविषयस्य नानात्वेन तद्बोधकस्य विधिप्रत्ययस्य नानार्थत्वप्रसंग इति चेन्न। नासुखत्वा
दिनाननुगतमिष्टत्वे नानुगतं फलं प्रतिसाधनत्वस्य यागादेर्लिङा। ऽऽदिना बोधनात्। तथा च फलानामन
नुगमाद्यं फलेच्छाशक्या न त्विच्छाज्ञानकारणत्वेनाऽथैवं सुखादिसाधनत्वज्ञानं प्रवर्त्तकं। तन्नाम कथमन
नुगमात्। यद्यशक्यमिष्टसाधनत्वं न तत् ज्ञानं प्रवर्त्तकमिति विधेः प्रवर्त्तकता न स्यात्। सा तादेव मे वा। किं वि
ष्टसाधनं याग इति लिङा बोधित इष्टाकीदायां काम्यत्वेनश्रुतः स्वर्ग इति स एव इष्टत्वेनावगम्यते। तथा च स्व
र्गकामस्य समस्तिव्याहारात् स्वर्गसाधनं याग इति ज्ञानं प्रवर्त्तकमुत्पद्यते। एवं च विधिजन्यज्ञानजन्यं ज्ञानं प्र
वर्त्तकं। यत्तु सर्वेषामेव विधेर्लसादात् प्रवर्त्तकत्वं। बाधात् विधिवाक्यात् स्वकृतिसाध्यतादेरनवगमा

53

ता। स्वेष्टसाधनत्वेवाहमिष्टसाधनंयागः स्वर्गकामत्वादर्शकादवगतस्वर्गकामवदिसनेतरेऽअर्थात्प्रतीयते
तत्र। किं नु यत्रेष्टानत्साधनमिति निशाबद्धानादेव प्रवृत्त्युपपत्तेः। तत्प्रतीतिर्निष्फला। अन्ये तु साधनत्वमात्रे
विध्यर्थः। स्वर्गादिसाधनता लोकतस्तु समभिव्याहारादिष्टसाधनतापत्ते कैश्चित्स्वोपजीव्यत्वात्। तथा
हियजेतेत्यनेन यागः कृतिसाध्यश्च साधनेवेतिबोधिते साधनस्य साध्याकांक्षायां कामनाविषयत्वेन श्रु
तो स्वर्ग एव साधनाकांक्षी साध्यत्वेनावगम्यतेऽन्वयस्थितत्वात्। न च यागस्य साधनाकांक्षा कृतिसाध्यत्वे ५३
नैवोपस्थितेः। अत एव विश्वजिदादौ स्वर्ग एव साध्यत्वेन कल्प्यत इति इष्टसाधनताविधिपक्षे। तस्मिन्नप्यै
तरति ब्रह्महत्यां योऽश्वमेधेन यजत इत्याद्यर्थ इत्याद्यर्थवादेन विधिबोध्येष्टसाधनत्वस्य अर्थवा
दादेवावगमात्। कुतो विधिकल्पनमिति चेत्। अविनाभावात्। तथाहि साधनत्वस्य विधेयत्वव्याहतत्वा

त्। व्यापकानुपलब्धेस्तद्बाधो द्वारापवादप्रयोजनत्वाभावान्न तत्कल्पनं तत्रैव स्यात्कृतः। यन्नु इष्टसाधनताभिधाने क
रणे लिङोनुशासनात् दर्शपौर्णमासाभ्यां निःसन्दिग्धाधिकारविहितात् तृतीयानस्यादिति। तन्न। उपाय
तामात्राभिधानेपि तद्विशेषकरणत्वात् नाभिधानात्। वक्ष्यतस्य अभिहिता न्वयलभ्यं यागेष्टसाधनत्वं
इष्टसाधनत्वमात्रस्य लिङर्थत्वात्। न व्याख्या। चिकीर्षाद्वारा ज्ञानस्य कृतौ हेतुता चिकीर्षाविरहिता विद्यास
न्नः प्रकृतस्य र्थ्य ग्रोवरेच्छावाविरुत्वात् विपक्षादिवत्। ननु कृतिविषयपाकादिविषये कृतिसाध्यत्वप्रकारि
केच्छावाचित्वं पाकादेः प्रकृतस्य नास्तिधेयत्वात्। नहि कृतिवाचकस्य तद्विषयवाचकत्वं कृत्येति स्पष्टे तद्वि
षये तेसंशयात्। एवं च कृताविष्टसाधनताज्ञानात् तत्साध्येष्टज्ञानाद्वा वृत्त्यादौ तथा कल्पनात्।
यदा च कृताविच्छा तदा सैव चिकीर्षा अन्यत्रेच्छामात्रं ननु कृतिसाध्यताज्ञानात् कृतौ कृतिसाध्यत्वात्

वात्। अथ पाकं कृत्या साधयामीतीच्छा अनुत्तवसिद्धा अनुत्तापलापेऽपेक्षणीयतापत्तेः। सा च कृतिसाध्यताज्ञा-
नात्। सा च क्रियाविषयत्वप्रतिपाद्यापि कृतिहेतुः समानविषयत्वात्। ननु कृतीच्छा कृतिहेतुः। कृतिविषयाविषयु-
त्वादिति चेन्न। अस्ति तावत्पाककृताविच्छा इष्टीच्छावत्। अस्ति च कृतिसाध्यत्वप्रकारिकेच्छा पाके तथापि कृतीच्छै-
व कृतिकारणी। लाघवात्। ननु कृतिसाध्यत्वप्रकारिकेच्छा गौरवात्। धात्वर्थानुपरक्ते कृतिस्वरूपे रच्छैव नोदेती-
ति चेन्न। पाकादिकृतीष्टसाधनताज्ञानात् पाककृताविच्छा ततः कृतिरित्यनुपगमात्। न चावगति हि प्रकृतेः ५४।
समानविषयत्वमुक्तयासिद्धं। तस्यैव विचार्यत्वात्। कथं तर्हि पाकं कृत्या साधयामीतीच्छा। यथा वह्निसाध्यत्वेनेष्ट-
साधनतावगमात् वह्निना पाकं साधयामीतीच्छा तथा कृतिसाध्यत्वेनेष्टसाधनत्वात् पाकस्य पाकं कृत्या सा-
धयामितीच्छा। अन्यथा तत्तदुपायसाध्यत्वेनेच्छा पाकादौ तत्तदुपायसाध्यत्वप्रकारकज्ञानात्स्यादिति स्वनेतत्

वृत्तेऽसतियन्न न वा तित तद्भाव ज्ञानसाध्यमिति व्याप्तेःन वान्वयः तस्मात् द्वित्वान्वयबलादेव हेतुना कांक्षितत्व
लक्षणसिद्धत्वज्ञानान्न त्वन्वयात्साकूतं इत्यकेचिद्घथात्तस्मादिति सर्वनाम्ना हेतोःपरामर्शः पूर्वोक्तान्वयव्यति
रेकानुसारेण यथा साध्यं तस्यापि तथेति सर्वनाम्नासि दृष्टव्यं विरोधिवारणाय युक्तः इत्याहुः केचित्तु तथेति
स्वरूपे [redacted] प्रकारेणासादृश्येयेवा। आद्ये तथाचायमितिप्रकमात्रथेति हेतुमानिसमर्थःस्यात् तथोचानन्वयः न
हि हेतुमत्वादेव हेतुमत्वमित्यन्विती। न द्वितीयः सामान्येन पक्षस्याप्यन्वय व्याप्तौ प्रवेशात्तत्प्रकारान्वयः तत्रैवेसंभ
नन्वयात्। अतएव न तृतीयोपि। केवलव्यतिरेकिणि अनेदानुमानेवान्वयिनि तस्मात् यथेति सादृश्याभा
वात् बहूनांच प्रक्रमे मेविशिष्यान्वयात् वादिवा स्येयोग्यतान्वयेत्तु प्रसंगात्। तस्मादित्यत्र तु विशेष्य
र्थान्वयादेव नियमः तस्मादिति नियम इत्यभिधाने न विशिष्यसिद्धतां गम्यते। एवं साध्यत योक्तस्यस्यसमर्थ

९९ 55 ० अ०

विं॰ मू॰ हेतुसंबंधेनैव पुनरुत्कीर्तनात्। अन्यथा नद्वैयर्थ्यात्। संशयप्रयोजनादयस्त्ववयवलक्षणाभावादेवना
९९ वयवाः किंतु न्यायोपयोगित्वेनाप्युच्यन्त इति नाधिक्यं। केचित्तु द्वारणस्यैव नस्यावत्रिकत्वं समयविशेषा
पयोगित्वादिति।। छ।। छ।। अथ हेत्वाभासास्तत्वनिर्णयविजयप्रयोजकत्वान्निरूप्यंते। तत्रानु
५५ मितिकारणीभूताभावप्रतियोगितायथार्थज्ञानविषयत्वं। यद्विषयत्वेन। लिंगस्यानुमितिप्र ज्ञान ४
नत्वाभि तिबंधकत्वं तद्वत्वं वा। ज्ञायमानं सदनुमितिप्रतिबंधकं यत् सहेत्वाभासः। दशाविशेषे ५५।।
तिमुरम्प सद्धेतोरेवासाधारणासत्प्रतिपक्षयोराभासत्वात् तद्वद्धेतुरनुमितिप्रतिबंधकत्वं बाधसत्प्रति पच पिं
गाढः ४ पक्षयोः प्रत्यक्षाद्यज्ञाने प्रतिबंधकत्वाद्यद्यपि न लिंगाभासत्वं। तथापि ज्ञायमानस्या
भासस्यात्र लक्षणं। यद्वा प्रत्यक्षादौ वाधेन ज्ञानं न प्रतिबध्यते किं तु सन्नेतत्राप्रामाण्यं ज्ञा ९९

प्यते अनुमितौ न्यूसत्तिरेव प्रतिबध्यते। ते च सव्यभिचारविरुद्धसत्प्रतिपक्षासिद्धबाधिताः पंच। स
व्यभिचारोपि त्रिविधः। साधारणासाधारणानुपसंहारिभेदात्। तत्र सव्यभिचारः साध्यतदभा
न ३ व प्रसंजकः इति चेत् यसाधारणं लक्षणं एकस्य उभयं प्रत्य साधकत्वात्। अनापादकत्वाच्च। क
नाप्युभयपक्षवृत्तित्वं उभयव्याहतत्वं वा। अननुगमात्। अथ साध्यसंदेहजनककोटिद्वयोप
स्थापकपक्षधर्मताज्ञानविषयत्वे सति हेत्वभिमतः सः। प्रत्येकं विप्रतिपत्तिषु प्रत्येकेन न तथा। न वा
पक्षवृत्तिः। साधारणमन्वयेन असाधारणं व्यतिरेकेण अनुपसंहारी पक्ष एवोन्वयस्य हष्टयेण
[illegible] कोटिद्वयोपस्थापकः। केवलान्वयि साध्यको नुपसंहारी अयं घटः एतत्वादित्य साधारणश्च
सद्धेतुरेव। तद्ज्ञानं दोषः पुरुषस्य। अत एवासाधारणं प्रकरणसमयोरभेदं नियदोषत्वं। अन्य

56

विं॰ सू॰ भासहेतौ बाधादिज्ञाने हेत्वाभाससाधिक्यापत्तिः न च प्रमेयत्वेनानेदानुमाने त्राद्यो अनित्यः शब्दः काशान्य ॐ
१०० तरत्वात् इत्यत्र च साधारण्यो अ[illegible]व्याप्तिः तयोः साध्यवद्वृत्तित्वेन विरुद्धत्वादिति चेन्न । एतद् ज्ञाने
६६ पि साधारण्यादि प्रत्येकस्य ज्ञानादुद्भावनात् स्वस्व परानुमितिप्रतिबंधात् तु उद्भावितेनान्निर्वाहात् असा
८ वे धारणादेरवश्योद्भाव्यत्वेन तस्यैव दोषत्वाच्च । एतेन पक्षवृत्तित्वे सत्यनुमितिविरोधिसंबंधाभाव
त्रिरनैकान्तिकः सपक्षविपक्षवृत्तित्वमुत्तयव्यावृत्तत्वमनुपसंहारित्वं वानुमितिविरोधितसंबंधः ५६
प्रत्येकमस्ति । विरुद्धोप्यनेनरूपेण सव्यभिचार एव तु पाधेश्च न संकर इति वध्यत इति निरस्तं । एतत्
ज्ञाने अज्ञाने पि चावश्यकप्रत्येकज्ञानस्य दोषत्वात् । असाधकतानुमितौ मध्ये विशेषणत्वाच्च ।
अत एव साध्याव्याप्यत्वे सति साध्याभावाव्याप्यो हेत्वाभासत्वं साध्यावन्मात्रवृत्त्यत्वे सति

गतसर्वस्य पक्षविपक्ष २
प्रमेयत्वे ३

व्या

साध्याभाववन्मात्रवृत्त्यन्यत्वं वेति परास्तं । अर्थविशेष्यत्वान्नप्रथमं हेत्वाभासत्वाज्ञानाच्च । गगनमनित्यं शब्दा
श्रयत्वादित्यादिबाधविरुद्धसंकीर्णे साधारणाव्याप्तेरिति कश्चित् । नापि सपक्षविपक्षव्यावृत्तत्वोन्यत
रत्वं व्यर्थविशेषणत्वात् । अनुपसंहार्यव्याप्तेश्च । किं च पक्षातिरिक्तसाध्यवतः सपक्षत्वेनाभेदसाध स्य ३
नेऽनुपसंहार्येऽव्याप्तिः पक्षातिरिक्तसाध्यवतोऽप्रसिद्धेः साध्यवतः सपक्षत्वे [redacted] विवक्षितेऽसि
द्धिः वृत्तिमतो धर्मस्य साध्यवद्विपक्षान्यतरवृत्तित्वनियमाद् नापि पक्षातिरिक्तसाध्यवन्मात्रवृत्त्यन्य
त्वे सति साध्याभाववन्मात्रवृत्तिभिन्नत्वं अनुपसंहार्यव्याप्तेः । भूमादावतिव्याप्तेश्च । तस्य पक्षेपि
साध्यवति वृत्तेः नापि पक्षवृत्तित्वे विरुद्धान्यत्वे च सत्यनुमित्यौपयिकसंबंधशून्यत्वं व्यर्थविशेष
णत्वात् । एतेनानुगतं साधारणमेव लक्षणं प्रयुक्तं प्रत्येकमेव दूषणत्वादुक्तदोषैर्वादिनिरस्तत्वेश्चान्यत्र ।।।।

× प्रमेयत्वेनानेकसाधनेऽनुपसंहार्य... नै ...सपक्षत्वे ५

पक्षातिरिक्त ३

वि॰ मू॰ उभयकोटिपस्थापकतावच्छेदकरूपवत्त्वं तत्त्वं विरुद्धान्यपक्षवृत्तित्वे सत्यनुमितिविरोधिसंबंधाव्याप्त्यतिरिक्तानै
१०१ कान्तिकत्वं । तत्र साधारणत्वादि तेनैव रूपेण ज्ञातस्य प्रतिबंधकत्वान्न परस्य तथैवोद्भावनान्न लक्ष
५७॥ णानुरोधेन प्रसिद्धक्रमेव हेत्वाभासत्वं यद्वा । साध्यवन्मात्रवृत्त्यन्यत्वे सति साध्याभाववन्मात्रवृत्त्यन्यत्वं
तेनासाधारणस्य साध्यतदभावोपस्थापकतया दूषणत्वं पक्षेनाव्याप्तिः । न चैवमाधिक्यविभागव्याघातः
२५ स्वरूपसतामनुगतैरूपेण त्रयाणामेकीकृत्य विभागकरणात् न चैवं साध्याभावज्ञापकत्वेन बाधप्रक ५७
रणसमयोस्तद्ज्ञापकतयान्येषामुपसंग्रहः कुतो न कृत इति वाच्यं । स्वतंत्रेच्छायाः नियोगपर्यनु
योगाविषयत्वात् । तत्र साधारणत्वं न साध्याभाववद्गामित्वं सर्वमनित्यं प्रमेयत्वादित्यस्यानुपसं ग्रं ३
हार्यत्वं नित्यागंधवत्वादित्यसाधारणे संयोगादिसाध्यक द्रव्यत्वे [redacted] । अतएव न साध्य
वदन्यवृत्तित्वं । नापि निश्चितसाध्यवत्तादन्यवृत्तित्वं । साध्यवदन्यवृत्तित्वस्य दूषकत्वे त्रयमेव

अतिव्याप्तिः [redacted] २

यर्थ्यात्। अत एवासुकेनैकान्तिकमित्येवोद्भाव्यते न तत एव वादिनिवृत्तिश्च। ननु सपक्षगतत्वमपि अनुपसंहार्यो व्या
वर्त्यो ऽन्यथा तस्यैव तद्विशेषत्वापत्तिरिति चेत्। एतज्जनहितमधिकं कृतेनं न भावात्। नापि सपक्षविपक्षगतत्वे
व्यर्थविशेषणत्वात् विरुद्धो व्यावर्त्यत इति चेन्न विपक्षगामित्वस्यैव दूषकत्वेन तस्याप्येतदंतर्भावात्। अथ पक्षा
न्यसाध्यवत्तदन्यवृत्तित्वं साधारणत्वं। तेन न सर्वमनित्यं मेयत्वादित्यनुपसंहार्येनातिप्रसंगः न व्यर्थविशे
षणता। घटौ नित्यौ घटाकाशोभयवृत्तित्वाभयत्वादित्यनुपसंहार्यस्य विरुद्धस्यानैकांतिकत्वस्य व्यावर्त्य
त्वादिति चेत्। दूषकताप्रयोजकरूपभेदमंतरेण तद्भेदस्यैवानुपपत्तेः। साध्यवद्वृत्तित्वे सति सर्वसाध्यवदन्यवृत्ति
त्वमित्यपि न व्यर्थविशेषणत्वात्। एकव्यक्तिसाध्येतद्भावात्। एते न हेत्वाभासांतरव्यवच्छेदकं लक्षणांतरे
पि विशेषणं व्यर्थमिति॥ उच्यते॥ विपक्षवृत्तित्वं साधारणत्वं तावन्मात्रस्य दूषकत्वात्। विरुद्धस्यापि
तत्वाज्ञाने विपक्षवृत्तित्वाज्ञानदशायां साधारणत्वं। अन्यथा तस्य हेत्वाभासांतरत्वापत्तेः॥ त

विं०अ० पाधेरसंकरएवं सर्वमनित्यंमेयत्वादित्यनुपसंहारी शब्दोनित्यः शब्दत्वात्। भूर्नित्यागंधवत्वादित्यसाधा
१०२ रणश्च वस्तुगत्यासाध्याभाववद्वृत्ति येन साधारणोपिपक्षतादशायामनुमापयितुं न शक्यत इत्यनयो
र्भेदेनोपन्यासः। सर्वसपक्षविपक्षव्यावृत्ति असाधारणः। ननु सपक्षत्वं न साध्यवन्मात्रत्वं विप
५८ क्षात्तत्तेः वृत्तिमतः साध्यवद्वृत्तित्वनियमानात्। नापिपक्षातिरिक्तसाध्यवत्वं। शब्दोनित्यः शब्दत्वादित्या
देः व्याप्तिधीदशायामपि असाधारणतापत्तेः। न चेष्टापत्तिः बाधप्रतिरोधौ विना व्याप्तिपक्षधर्मताज्ञानाद या५
नुमितिनियमादिति चेत्। न। सर्वनिश्चितसाध्यकत्वविपक्षव्यावृत्तत्वं तत्वात्। शब्दत्वानित्यत्वव्याप्ति ५८
ग्रहे सति शब्दे साध्यनिश्चयान्नातिव्याप्तिः न च पक्षदोषमेतत्स्यादिति सन्देहेनातिव्याप्तिः। साध्यसंदे
हदशायां तस्य हेत्वाभासत्वात्। यद्यपि भूर्नित्यागंधवत्वादित्यादिर्वस्तुतः साधारणः शब्दोनित्यः श
ब्दत्वादित्यादि विरुद्धः शब्दो अनित्यो शब्दत्वादिति सहेतुरेव व्याप्यता तस्य प्रकृष्टत्वादि ह ए